.. 10. sauptikaparva Kumbhaghonam Edition ..
॥ १०. सौप्तिकपर्व ॥

सौप्तिकपर्व - अध्याय ००१
॥ श्रीः ॥
१०.१. अध्यायः १

Mahabharata - Sauptika Parva - Chapter Topics
सञ्जयधृतराष्ट्रयोः संलापः ॥ १ ॥
द्रौणिकृपकृतवर्मभिर्वनमध्यमेत्य न्यग्रोधस्याधस्तादुपवेशनम्
॥ २ ॥
तत्र रात्रौ घूकेन बहुकाकावधदर्शिना द्रौणिना तद्वत्स्वेनापि
पाण्डववधनिर्धारणम् ॥ ३ ॥
ततः कृपकृतवर्माणौ समुद्बोध्य स्वकर्तव्यकथनप्रार्थना ॥ ४ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-१-० (६३९४४)
श्रीवेदव्यासाय नमः। १०-१-०क्ष् (५२६०)
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १०-१-१ (६३९४५)
सञ्जय उवाच। १०-१-१क्ष् (५२६१)
ततस्ते सहिताः सर्वे प्रयाता दक्षिणामुखाः ।
उपास्तमयवेलायां शिबिराभ्याशमागताः ॥ १०-१-१ (६३९४६)
विमुच्य वाहांस्त्वरिता भीताः समनुबोधनात् ।
गहनं देशमासाद्य प्रच्छन्ना न्यविशन्त ते ॥ १०-१-२ (६३९४७)
सेनानिवेशमभितो नातिदूरमवस्थिताः ।
शनिकृत्ता निशितैः शस्त्रैः समन्तात्क्षतविक्षताः ॥
दीर्घमुष्णं च निःश्वस्य पाण्डवानन्वचिन्तयन् ॥ १०-१-३ (६३९४८)
श्रुत्वा च निनदं घोरं पाण्डवानां जयैषिणाम् ।
अनुसारभयाद्भीताः प्राङ्मुखाः प्राद्रवन्पुनः ॥ १०-१-४ (६३९४९)
ते मुहूर्तात्ततो गत्वा श्रान्तवाहा पिपासिताः ।
नामृष्यन्त महेष्वासाः क्रोधामर्षवशङ्गताः ॥ १०-१-५ (६३९५०)

राज्ञो वधेन सन्तप्ता मुहूर्तं समवस्थिताः ॥ १०-१-६ (६३९५१)
धृतराष्ट्र उवाच। १०-१-७क्ष् (५२६२)
अश्रद्धेयमिदं कर्म कृतं भीमेन सञ्जय ।
यत्स नागायुतप्राणः पुत्रो मम निपातितः ॥ १०-१-७ (६३९५२)
अवध्यः सर्वभूतानां वज्रसंहननो युवा ।
पाण्डवैः समरे पुत्रो निहतो मम निपातितः ॥ १०-१-८ (६३९५३)
न दिष्टमभ्यतिक्रान्तुं शक्यं गावल्गणे नरैः ।
यत्समेत्य रणे पार्थैः पुत्रो मम निपातितः ॥ १०-१-९ (६३९५४)
अद्रिसारमयं नूनं हृदयं मम सञ्जय ।
हतं पुत्रशतं श्रुत्वा यन्न दीर्णं सहस्रधा ॥ १०-१-१० (६३९५५)
कथं हि वृद्धमिथुनं हतपुत्रं भविष्यति ।
न ह्यहं पाण्डुपुत्रस्य विषये वस्तुमुत्सहे ॥ १०-१-११ (६३९५६)
कथं राज्ञः पिता भूत्वा स्वयं राजा च सञ्जय ।
प्रेष्यभूतः प्रवर्तेयं पाण्डवेयस्य शासनात् ॥ १०-१-१२ (६३९५७)
प्रभुज्य पृथिवीं सर्वां स्थिता मूर्धनि सञ्जय ।
कथमद्य भविष्यामि श्रोतुं शक्ष्यामि सञ्जय। १०-१-१३ (६३९५८)
येन पुत्रशतं पूर्णमेकेन निहतं मम ॥
कृतं सत्यं वचस्तस्य विदुरस्य महात्मनः। १०-१-१४ (६३९५९)
अकुर्वता वचस्तस्य मम पुत्रेण सञ्जय ॥
अधर्मेण हते तात पुत्रे दुर्योधने मम। १०-१-१५ (६३९६०)
कृतवर्मा कृपो द्रौणिः किमकुर्वत सञ्जय ॥ १०-१-१६ (६३९६१)
सञ्जय उवाच। १०-१-१७क्ष् (५२६३)
गत्वा तु तावका राजन्नातिदूरं मनस्विनः ।
अपश्यन्त वनं घोरं नानाद्रुमलतावृतम् ॥ १०-१-१७ (६३९६२)
ते मुहूर्तं तु विश्रम्य लब्धतोयैर्हयोत्तमैः ।
सूर्यास्तमयवेलायां कौरवेयस्य शासनात् ॥ १०-१-१८ (६३९६३)
नानामृगगणैर्जुष्टं नानापक्षिभिराकुलम् ।
नानाद्रुमलताच्छन्नं नानाव्यालनिषेवितम् ॥ १०-१-१९ (६३९६४)
नानातोयसमाकीर्णैस्तटाकैरुपशोभितम् ।
पद्मिनीशतसञ्छन्नं नीलोत्पलसमायुतम् ॥ १०-१-२० (६३९६५)
प्रविश्य तद्वनं घोरं वीक्षमाणाः समन्ततः ।
शाखासहस्रसञ्छन्नं न्यग्रोधं ददृशुस्ततः ॥ १०-१-२१ (६३९६६)
उपेत्य तु तदा राजन्न्यग्रोधं ते महारथाः ।
ददृशुर्द्विपदां श्रेष्ठाः श्रेष्ठं तं वै वनस्पतिम् ॥ १०-१-२२ (६३९६७)
तेऽवतीर्य रथेभ्यश्च विप्रमुच्य च वाजिनः ।
उपस्पृश्य यथान्यायं सन्ध्यामन्वासत प्रभो ॥ १०-१-२३ (६३९६८)

ततोऽस्तं पर्वतश्रेष्ठमनुप्राप्ते दिवाकरे ।
सर्वस्य जगतो धात्री शर्वरी प्रत्यपद्यत ॥१०-१-२४ (६३९६९)
ग्रहनक्षत्रताराभिः प्रकीर्णाभिरलङ्कृतम् ।
नभोंऽशुकमिवाभाति प्रेक्षणीयं समन्ततः ॥१०-१-२५ (६३९७०)
इच्छया ते प्रवल्गन्ति ये सत्वा रात्रिचारिणः ।
दिवाचराश्च ये सत्वास्ते निद्रावशमागताः ॥१०-१-२६ (६३९७१)
रात्रिञ्चराणां सत्वानां निनादोऽभूत्सुदारुणः ।
क्रव्यादाश्च प्रमुदिता घोरा प्राप्ता च शर्वरी ॥१०-१-२७ (६३९७२)
तस्मिन्रात्रिमुखे घोरे दुःखशोकसमन्विताः ।
कृतवर्मा कृपो द्रौणिरुपोपविविशुः समम् ॥१०-१-२८ (६३९७३)
उपोपविष्टाः शोचन्तो न्यग्रोधस्य समीपतः ।
तमेवार्थमतिक्रान्तं कुरुपाण्डवयोः क्षयम् ॥१०-१-२९ (६३९७४)
निद्रया च परीताङ्गा निषेदुर्धरणीतले ।
श्रमेण सुदृढं युक्ता विक्षता विविधैः शरैः ॥१०-१-३० (६३९७५)
ततो निद्रावशं प्राप्तौ कृपभोजौ महाबालौ ।
सुखोचितावदुःखार्हौ निषण्णौ धरणीतले ॥१०-१-३१ (६३९७६)
तौ तु सुप्तौ महाराज तस्मिन्देशे महारथौ ।
श्महार्हशयनोपेतौ भूमावेव ह्यनाथवत् ॥ꣿ १०-१-३२ (६३९७७)
क्रोधामर्षवशं प्राप्तो द्रोणपुत्रस्तु भारत ।
न वै स्म स जगामाथ निद्रां सर्प इव श्वसन् ॥१०-१-३३ (६३९७८)
न लेभे स तु निद्रां वै दह्यमानोऽतिमन्युना ।
वीक्षाञ्चक्रे महाबाहुस्तद्वनं घोरदर्शनम् ॥१०-१-३४ (६३९७९)
वीक्षमाणो वनोद्देशं नानासत्वैर्निषेवितम् ।
अपश्यत महाबाहुर्न्यग्रोधं वायसावृतम् ॥१०-१-३५ (६३९८०)
तत्र काकसहस्राणि तां निशां पर्यणामयन् ।
सुखं स्वपन्तः कौरव्य पृथक्पृथगुपाश्रयाः ॥१०-१-३६ (६३९८१)
सुप्तेषु तेषु काकेषु विस्रब्धेषु समन्ततः ।
सोऽपश्यत्सहसा यान्तमुलूकं घोरदर्शनम् ॥१०-१-३७ (६३९८२)
महास्वनं महाकायं हर्यक्षं बभ्रुपिङ्गलम् ।
सुतीक्ष्णघोणानखरं सुपर्णमिव वेगितम् ॥१०-१-३८ (६३९८३)
सोऽथ शब्दं मृदुं कृत्वा लीयमान इवाण्डजः ।
न्यग्रोधस्य ततः साखां पातयामास भारत ॥१०-१-३९ (६३९८४)
सन्निपत्य तु शाखायां न्यग्रोधस्य विहङ्गमः ।
सुप्ताञ्जघान विस्रब्धान्वायसान्वायसान्तकः ॥१०-१-४० (६३९८५)
केषाञ्चिदच्छिनत्पक्षाञ्शिरांसि च चकर्त ह ।
चरणांश्चैव केषाञ्चिद्बभञ्ज चरणायुधः ॥१०-१-४१ (६३९८६)

क्षणेनाघ्नत्स बलवान्येऽस्य दृष्टिपथे स्थिताः ॥ १०-१-४२ (६३९८७)
तेषां शरीरावयवैः शरीरैश्च विशाम्पते ।
न्यग्रोधमण्डलं सर्वं सञ्छन्नं पर्वतोपमम् ॥ १०-१-४३ (६३९८८)
तांस्तु हत्वा ततः काकान्कौशिको मुदितोऽभवत् ।
प्रतिकृत्य यथाकामं शत्रूणां शत्रुसूदनः ॥ १०-१-४४ (६३९८९)
तद्दृष्ट्वा तादृशं कर्म कौशिकेन कृतं निशि ।
तद्भावे कृतसङ्कल्पो द्रौणिरेकोऽन्वचिन्तयत् ॥ १०-१-४५ (६३९९०)
उपदेशः कृतोऽनेन पक्षिणा मम संयुगे ।
शत्रूणां क्षपणं युक्तं प्राप्तः कालश्च मे मतः ॥ १०-१-४६ (६३९९१)
नाद्य शक्यं मया हन्तुं पाण्डवा जितकाशिनः ।
बलवन्तः कृतोत्साहा लब्धलक्षाः प्रहारिणः ॥ १०-१-४७ (६३९९२)
राज्ञः सकाशे तेषां च प्रतिज्ञातो वधो मया ।
पतङ्गाग्निसमां वृत्तिमास्यायात्मविनाशिनीम् ॥ १०-१-४८ (६३९९३)
न्यायतो युध्यमानस्य प्राणत्यागो न संशयः ।
छद्मना तु भवेत्सिद्धिः शत्रूणां च क्षयो महान् ॥ १०-१-४९ (६३९९४)
तत्र सशयितादर्थाद्योऽर्थो निःसंशयो भवेत् ।
तं जना बहुमन्यन्ते येऽर्थशास्त्रविशारदाः ॥ १०-१-५० (६३९९५)
यच्चाप्यत्र भवेत्कार्यं गर्हितं लोकनिन्दितम् ।
कर्तव्यं तन्मनुष्येण क्षत्रधर्मेण वर्तता ॥ १०-१-५१ (६३९९६)
निन्दितानि च कर्माणि कुत्सितानि पदेपदे ।
सोपधानि कृतान्येव पाण्डवैरकृतात्मभिः ॥ १०-१-५२ (६३९९७)
अस्मिन्नर्थे पुरा गीताः श्रूयन्ते धर्मवित्तमैः ।
श्लोका न्यायमवेक्षद्भिस्तत्त्वार्थास्तत्त्वदर्शिभिः ॥ १०-१-५३ (६३९९८)
परिश्रान्ते विदीर्णे वा भुञ्जाने वाऽपि शत्रुभिः ।
प्रस्थाने वा प्रवेशे वा प्रहर्तव्यं रिपोर्बलम् ॥ १०-१-५४ (६३९९९)
निद्रार्तमर्धरात्रे च तथा नष्टप्रणायकम् ।
भिन्नयोधं बलं यच्च द्विधा युक्तं च यद्भवेत् ॥ १०-१-५५ (६४०००)
इत्येवं निश्चयं चक्रे सुप्तानां निशि मारणे ।
पाण्डूनां सह पाञ्चालैर्द्रोणपुत्रः प्रतापवान् ॥ १०-१-५६ (६४००१)
स क्रूरां मतिमास्थाय विनिश्चित्य मुहुर्मुहुः ।
सुप्तौ प्राबोधयत्तौ तु मातुलं भोजमेव च ॥ १०-१-५७ (६४००२)
तौ प्रबुद्धौ महात्मानौ कृपभोजौ महाबालौ ।
नोत्तरं प्रतिपद्येतां तत्र युक्तं ह्रिया वृतौ ॥ १०-१-५८ (६४००३)
स मुहूर्तमिव ध्यात्वा तावुभौ वाक्यमब्रवीत् ॥ १०-१-५९ (६४००४)
हतो दुर्योधनो राजा एकवीरो मबाहलः ।
यस्यार्थे वैरमस्माभिरासक्तं पाण्डवैः सह ॥ १०-१-६० (६४००५)

एकाकी बहुभिः क्षुद्रैराहवे शुद्धविक्रमः ।
पातितो भीमसेनेन एकादशचमूपतिः ॥ १०-१-६१ (६४००६)
वृकोदरेण क्षुद्रेण सुनृशंसमिदं कृतम् ।
मूर्धाभिषिक्तस्य शिरः पादेन परिमृद्नता ॥ १०-१-६२ (६४००७)
विनर्दन्ति च पाञ्चालाः क्ष्वेलन्ति च हसन्ति च ।
धमन्ति शङ्खाञ्शतशो हृष्टा घ्नन्ति च दुन्दुभीन् ॥ १०-१-६३ (६४००८)
वादित्रघोषस्तुमुलो विमिश्रः शङ्खनिःस्वनैः ।
अनिलेनेरितो घोरो दिशः पूरयतीव ह ॥ १०-१-६४ (६४००९)
अश्वानां हेषमाणानां गजानां चैव बृंहताम् ।
सिंहनादश्च शूराणां श्रूयते सुमहानयम् ॥ १०-१-६५ (६४०१०)
दिशं प्राचीं समाश्रित्य हृष्टानां गच्छतां भृशम् ।
रथनेमिस्वनाश्चैव श्रूयन्ते रोमहर्षणाः ॥ १०-१-६६ (६४०११)
पाण्डवैर्धार्तराष्ट्राणां यदिदं कदनं कृतम् ।
वयमेव त्रयः शिष्टा अस्मिन्महति वैशसे ॥ १०-१-६७ (६४०१२)
केचिन्नागशतप्राणाः केचित्सर्वास्त्रकोविदाः ।
निहताः पाण्डवैर्यस्मिन्मन्ये कालस्य पर्ययम् ॥ १०-१-६८ (६४०१३)
एवमेतेन भाव्यं हि नूनं कार्येण तत्त्वतः ।
यथा ह्यस्येदृशी निष्ठा कृते यत्नेऽपि दुष्करे ॥ १०-१-६९ (६४०१४)
भवतोस्तु यदि प्रज्ञा न मोहादपचीयते ।
व्यसनेऽस्मिन्महत्यर्थे यन्नः श्रेयस्तदुच्यताम् ॥ ॥ १०-१-७० (६४०१५)

इति श्रीमन्महाभारते सौप्तिकपर्वणि प्रथमोऽध्यायः ॥ १ ॥

Mahabharata - Sauptika Parva - Chapter Footnotes

१०-१-१ ततः दुर्योधनेन सैनापत्येऽश्वत्थाम्नोऽभिषेकानन्तरं
ते अश्वत्थामकृपाचार्यकृतवर्माणः ॥
१०-१-२ शिबिरनिकटस्थं देशं आसाद्य वाहान्विमुच्य न्यविशन्तेति योजना ॥
१०-१-४ अनुसारः पृष्ठगमनम् । प्राद्रवन्निति पुनर्वाहान्योजयित्वेति
गम्यते ॥
१०-१-६ राज्ञो दुर्योधनस्य ॥
१०-१-२० नानापुष्पोपशोभितमिति झ पाठः ॥
१०-१-२३ अन्वासत उपासितवन्तः ॥
१०-१-२५ अंशुकं वस्त्रम् ॥
१०-१-३२ शयनोपेतौ प्रागिति शेषः ॥
१०-१-३६ पर्यणामयन् परिणीतवन्त आसन् ॥
१०-१-३८ हर्यक्ष्यं हरिन्मणिनिभलोचनम् । घाणा नासा ॥

सौप्तिकपर्व - अध्याय ००२
॥ श्रीः ॥
१०.२. अध्यायः २

Mahabharata - Sauptika Parva - Chapter Topics
कृपेण द्रौणिम्प्रति कर्तव्योपदेशः ॥ १ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-२-० (६४०१६)
कृप उवाच। १०-२-०क्ष् (५२६४)
श्रुतं ते वचनं सर्वं हेतुयुक्तं मया विभो ।
ममापि तु वचः किञ्चिच्छृणुष्वाद्य महाभुज ॥ १०-२-१ (६४०१७)
आबद्धा मानुषाः सर्वे निबद्धाः कर्मणोर्द्वयोः ।
दैवे पुरुषकारे च परं ताभ्यां न विद्यते ॥ १०-२-२ (६४०१८)
न हि दैवेन सिध्यन्ति कार्याण्येकेन सत्तम ।
न चापि कर्मणैकेन द्वाभ्यां सिद्धिस्तु योगतः ॥ १०-२-३ (६४०१९)
ताभ्यामुभाभ्यां सर्वार्था निबद्धा अधमोत्तमाः ।
प्रवृत्ताश्चैव दृश्यन्ते निवृत्ताश्चैव सर्वशः ॥ १०-२-४ (६४०२०)
पर्जन्यः पर्वते वर्षन्किन्नु साधयते फलम् ।
कृष्टे क्षेत्रे तथा वर्षन्किं न साधयते फलम् ॥ १०-२-५ (६४०२१)
उत्थानं चापि दैवस्य ह्यनुत्थानं च दैवतम् ।
व्यर्थं भवति सर्वत्र पूर्वस्तत्र विनिश्चयः ॥ १०-२-६ (६४०२२)
सुवृष्टे च यथा देवे सम्यक् क्षेत्रे च कर्षिते ।
बीजं महागुणं भूयात्तथा सिद्धिर्हि मानुषी ॥ १०-२-७ (६४०२३)
तयोर्दैवं तु दुश्चिन्त्यं स्ववशेनैव वर्तते ।
प्राज्ञाः पुरुषकारे तु वर्तन्ते देवमास्थिताः ॥ १०-२-८ (६४०२४)
ताभ्यां सर्वे हि कार्यार्था मनुष्याणां नरर्षभ ।
विचेष्टन्तः स्म दृश्यन्ते निवृत्तास्तु तथैव च ॥ १०-२-९ (६४०२५)
कृतः पुरुषकारश्च सोऽपि दैवेन सिध्यति ।
तथास्य कर्मणः कर्तुरभिनिर्वर्तते फलम् ॥ १०-२-१० (६४०२६)
उत्थानं च मनुष्याणां दक्षाणां दैववर्जितम् ।
अफलं दृश्यते लोके सम्यगप्युपपादितम् ॥ १०-२-११ (६४०२७)
तत्रालसा मनुष्याणां ये भवन्त्यमनस्विनः ।

उत्थानं ते विगर्हन्ति प्राज्ञानां तन्न रोचते ॥ १०-२-१२ (६४०२८)
प्रायशो हि कृतं कर्म नाफलं दृश्यते भुवि ।
अकृत्वा च पुनर्दुःखं कर्म पश्येन्महाफलम् ॥ १०-२-१३ (६४०२९)
चष्टामकुर्वंल्लभते यदि किञ्चिद्यदृच्छया ।
यो वा न लभते कृत्वा दुर्दर्शौ तावुभावपि ॥ १०-२-१४ (६४०३०)
शक्नोति जीवितुं दक्षो नालसः सुखमेधते ।
दृश्यन्ते जीवलोकेऽस्मिन्दक्षाः प्रायो हितैषिणः ॥ १०-२-१५ (६४०३१)
यदि दक्षः समारम्भात्कर्मणो नाश्नुते फलम् ।
नास्य वाच्यं भवेत्किञ्चिल्लब्धव्यं वाऽधिगच्छति ॥ १०-२-१६ (६४०३२)
नाकृत्वा कर्म लोके हि फलं विन्दति कर्हिचित् ।
स तु वक्तव्यतां याति द्वेष्यो भवति भूयशः ॥ १०-२-१७ (६४०३३)
एवमेतदनादृत्य वर्तते यस्त्वतोऽन्यथा ।
स करोत्यात्मनोऽनर्थानेष बुद्धिमतां नयः ॥ १०-२-१८ (६४०३४)
हीनं पुरुषकारेण यदि दैवेन वा पुनः ।
कारणाभ्यामथैताभ्यामुत्थानमफलं भवेत् ॥ १०-२-१९ (६४०३५)
हीनं पुरुषकारेण कर्म त्विह न सिध्यति ॥ १०-२-२० (६४०३६)
दैवतेभ्यो नमस्कृत्य यस्त्वर्थान्सम्यगीहते ।
दक्षो दाक्षिण्यसम्पन्नो न स मोघैर्विहन्यते ॥ १०-२-२१ (६४०३७)
सम्यगीहा पुनरियं या बृद्धानुपसेवते ।
आपृच्छति च यच्छ्रेयः करोति च हितं वचः ॥ १०-२-२२ (६४०३८)
उत्थायोत्थाय हि सदा प्रष्टव्या वृद्धसम्मताः ।
ते स्म योगे परं मूलं तन्मूला सिद्धिरुच्यते ॥ १०-२-२३ (६४०३९)
वृद्धानां वचनं श्रुत्वा योऽभ्युत्थानं प्रयोजयेत् ।
उत्थानस्य फलं सम्यक्तदा स लभतेऽचिरात् ॥ १०-२-२४ (६४०४०)
रागात्क्रोधाद्भयाल्लोभाद्योऽर्थानीहेत मानवः ।
अनीशश्चावमानी च स शीघ्रं भ्रश्यते श्रियः ॥ १०-२-२५ (६४०४१)
सोयं दुर्योधनेनार्थो लुब्धेनादीर्घदर्शिना ।
असमर्थः समारब्धो मूढत्वादविचिनन्तितः ॥ १०-२-२६ (६४०४२)
हितबुद्धीननादृत्य सम्मन्त्र्यासाधुभिः सह ।
वार्यमाणोऽकरोद्वैरं पाण्डवैर्गुणवत्तरैः ॥ १०-२-२७ (६४०४३)
पूर्वमप्यतिदुःशीलो न धैर्यं कर्तुमर्हति ।
तपत्यर्थे विपन्ने हि मित्राणां न कृतं वचः ॥ १०-२-२८ (६४०४४)
अनुवर्तामहे यत्तु तं वयं पापपूरुषम् ।
अस्मानप्यनयस्तस्मात्प्राप्तोऽयं दारुणो महान् ॥ १०-२-२९ (६४०४५)
अएन तु ममाद्यापि व्यसनेनोपतापिता ।
बुद्धिश्चिन्तयते किञ्चित्स्वं श्रेयो नावबुध्यते ॥ १०-२-३० (६४०४६)

मुह्यता तु मनुष्येण प्रष्टव्याः सुहृदो जनाः ।
तत्रास्य बुद्धिर्विनयस्तत्र श्रेयश्च पश्यति ॥ १०-२-३१ (६४०४७)
ततोऽस्य मूलं कार्याणां बुद्ध्या निश्चित्य वै बुधाः'।
तेऽत्र पृष्टा यथा ब्रूयुस्तत्कर्तव्यं तथा भवेत् ॥ १०-२-३२ (६४०४८)
ते वयं धृतराष्ट्रं च गान्धारीं च यशस्विनीम् ।
उपपृच्छामहे गत्वा विदुरं च महामतिम् ॥ १०-२-३३ (६४०४९)
ते पृष्टास्तु वदेयुर्यच्छ्रेयो नः समनन्तरम् ।
तदस्माभिः पुनः कार्यमिति मे नैष्ठिकी मतिः ॥ १०-२-३४ (६४०५०)
अनारम्भात्तु कार्याणां नार्थः सम्पद्यते क्वचित् ॥ १०-२-३५ (६४०५१)
कृते पुरुषकारे तु येषां कार्यं न सिध्यति ।
दैवेनोपहतास्ते तु नात्र कार्या विचारणा ॥ ॥ १०-२-३६ (६४०५२)

इति श्रीमन्महाभारते सौप्तिकपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

Mahabharata - Sauptika Parva - Chapter Footnotes

१०-२-२ दैवे आसमन्तात् बद्धाः पुरुषकारे निहीनतया बद्धाः ।तेन दैवं प्रधानं पुरुषकार उपसर्जनमित्युक्तं भवति। आरम्भा मानुषाः सर्वे इति क पाठः ॥
१०-२-६ उत्थानमिति ।दैवस्य प्रधानस्योत्थानं पुरुषकारो व्यर्थं भवति तथाऽनुत्थानमुत्थानहीनं दैवमपि व्यर्थमिति पक्षद्वयं सर्वत्र व्यवस्यति तत्र पूर्वएव पक्षः श्रेयानित्यर्थः ॥
१०-२-९ विचेष्टन्तः प्रवृत्ता दृश्यन्ते लोकदृष्ट्येत्यर्थः ॥
१०-२-१३ कर्माकृत्वा दुःखं पश्येदित्यापि प्रायशोऽस्ति ॥
१०-२-१४ दुर्दर्शौ दुर्लभौ ॥
१०-२-१६ स्पर्शं चास्याधिगच्छतीति छ पाठः ।तत्र अस्य कर्मणः स्पर्शं लोकस्य सम्बन्धं चाधिगच्छति लोकप्रियः स्यादित्यर्थः ॥
१०-२-१७ अकृत्वा कर्म यो लोके फलं विन्दति धिष्ठित इति झ पाठः ।तत्र अदक्षस्तु परप्रयत्नार्जितेन जीवन्नपि भोक्तुमेवायं समर्थो नार्जयितुमिति निन्द्यत इति भावः ॥
१०-२-१८ एतत् दैवदाक्ष्ययोः साहित्यम् ।अन्यथा तयोरन्यतरालम्बनेन ॥
१०-२-२३ योगे अलब्धलाभे ॥
१०-२-२५ अनीशः अजितचित्तः ।अवमानी परमवजानन् ॥
१०-२-२ द्वितीयोऽध्यायः ॥

सौप्तिकपर्व - अध्याय ००३

॥ श्रीः ॥

१०.३. अध्यायः ३

Mahabharata - Sauptika Parva - Chapter Topics

द्रौणिना कृपवचनमनादृत्य कृपकृतवर्मणोः पुरतः निशि प्रसुप्तपाण्डुपाञ्चालहननप्रतिज्ञानम् ॥ १ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-३-० (६४०५३)
सञ्जय उवाच। १०-३-०क्ष् (५२६५)
कृपस्य वचनं श्रुत्वा धर्मार्थसहितं शुभम् ।
अश्वत्थामा महाराज दुःखशोकसमन्वितः ॥ १०-३-१ (६४०५४)
दह्यमानस्तु शोकेन प्रदीप्तेनाग्निना यथा ।
क्रूरं मनस्ततः कृत्वा तावभौ प्रत्यभाषत ॥ १०-३-२ (६४०५५)
पुरुषेपुरुषे बुद्धिर्याया भवति शोभना ।
तुष्यन्ति च पृथक्सर्वे प्रज्ञया ते स्वयास्वया ॥ १०-३-३ (६४०५६)
सर्वो हि मन्यते लोक आत्मानं बुद्धिमत्तरम् ।
सर्वस्यात्मा बहुमतः सर्वोत्मानं प्रशंसति ॥ १०-३-४ (६४०५७)
सर्वस्य हि स्वका प्रज्ञा साधुवादे प्रतिष्ठिता ।
परबुद्धिं च निन्दन्ति स्वां प्रशंसन्ति चासकृत् ॥ १०-३-५ (६४०५८)
कारणान्तरयोगेन येषां संवदते मतिः ।
तेऽन्योन्येन च तुष्यन्ति बहुमन्यन्ति चासकृत् ॥ १०-३-६ (६४०५९)
तस्यैव तु मनुष्यस्य सासा बुद्धिस्तदातदा ।
कालयोगे विपर्यासं प्राप्यान्योन्यं विपद्यते ॥ १०-३-७ (६४०६०)
अनित्यत्वात्तु चित्तानां मनुष्याणां विशेषतः ।
चित्तवैक्लब्यमासाद्य सासा बुद्धिः प्रजायते ॥ १०-३-८ (६४०६१)
यथा हि वैद्यः कुशलो ज्ञात्वा व्याधिं यथाविधि ।
भैषज्यं कुरुते योगात्प्रशमार्थमिति प्रभो ॥ १०-३-९ (६४०६२)
एवं कार्यस्य योगात्प्रशमार्थमिति प्रभो ॥
प्रज्ञया च स्वया युक्त्या तां च गृह्णन्ति वै बुधाः ॥ १०-३-१० (६४०६३)
अन्यया यौवने बाल्ये बुद्ध्या भवति मोहितः ।
मध्येऽन्यया जरायां तु सोन्यां रोचयते मतिम् ॥ १०-३-११ (६४०६४)
व्यसन वा महाघोरं समृद्धिं चापि तादृशीम् ।
अवाप्य पुरुषो भोज कुरुते बुद्धिवैकृतम् ॥ १०-३-१२ (६४०६५)
एकस्मिन्नेव पुरुषे सासा बुद्धिस्तदातदा ।

भवत्यनित्या प्रज्ञा हि सा तस्यैव न रोचते ॥ १०-३-१३ (६४०६६)
निश्चित्य तु यथाप्रज्ञं यां मतिं साधु पश्यति ।
तया प्रकुरुते भावं सा तस्योद्योगकारिका ॥ १०-३-१४ (६४०६७)
सर्वो हि पुरुषो भोज साध्वेतदिति निश्चितः ।
कर्तुमारभते प्रीतिं मरणादिषु कर्मसु ॥ १०-३-१५ (६४०६८)
सर्वे हि युक्तां विज्ञाय प्रज्ञां वापि स्वकां नराः ।
चेष्टन्ते विविधां चेष्टां हितमित्येव जानते ॥ १०-३-१६ (६४०६९)
उपजाता व्यसनजा येयमद्य मतिर्मम ।
युवयोस्तां प्रवक्ष्यामि सर्वेषां शोकनाशिनीम् ॥ १०-३-१७ (६४०७०)
प्रजापतिः प्रजाः सृष्ट्वा कर्म तासु विधाय च ।
वर्णेवर्णे समाधत्त ह्येकैकं गुणवत्तरम् ॥ १०-३-१८ (६४०७१)
ब्राह्मणे वेदमग्र्यं तु क्षत्रिये तेज उत्तमम् ।
दाक्ष्यं वैश्ये च शूद्रे च सर्ववर्णानुकूलताम् ॥ १०-३-१९ (६४०७२)
अदान्तो ब्राह्मणोऽसाधुर्निस्तेजाः क्षत्रियो मृतः ।
अदक्षो निन्द्यते वैश्यः शूद्रश्च प्रतिकूलवान् ॥ १०-३-२० (६४०७३)
सोऽस्मि जातः कुले श्रेष्ठे ब्राह्मणैरभिपूजिते ।
मन्दभाग्यतयाऽस्म्येतं क्षत्रधर्ममनुष्ठितः ॥ १०-३-२१ (६४०७४)
क्षत्रधर्मं विदित्वाऽहं यदि ब्राह्मण्यमाश्रितः ।
प्रकरिष्ये महत्कर्म न मे तत्साधुसम्मतम् ॥ १०-३-२२ (६४०७५)
धारयित्वा धनुर्दिव्यं दिव्यान्यस्त्राणि चाहवे ।
पितरं निहतं दृष्ट्वा किन्नु वक्ष्यामि संसदि ॥ १०-३-२३ (६४०७६)
सोऽहमद्य यथाकामं क्षत्रधर्ममवाप्य च ।
गन्ताऽस्मि पदवीं राज्ञः पितुश्चापि महात्मनः ॥ १०-३-२४ (६४०७७)
अद्य स्वप्स्यन्ति पाञ्चाला विश्वस्ता जितकाशिनः ।
विमुक्तयुग्यकवचा हर्षेण च समन्विताः ।
वयं जिता मताश्चैषां श्रान्ता व्यायामकर्शिताः ॥ १०-३-२५ (६४०७८)
तेषां निशि प्रसुप्तानां सुस्थानां शिबिरे स्वके ।
अवस्कन्दं करिष्यामि शिबिरस्याद्य दुष्करम् ॥ १०-३-२६ (६४०७९)
तानवस्कन्द्य शिबिरे प्रेतभूतानचेतसः ।
सूदयिष्यामि विक्रम्य मघवानिव दानवान् ॥ १०-३-२७ (६४०८०)
अद्य तान्सहितान्सर्वान्धृष्टद्युम्नपुरोगमान् ।
सूदयिष्यामि विक्रम्य कक्षं दीप्त इवानलः ॥ १०-३-२८ (६४०८१)
निहत्य चैव पाञ्चालाञ्शान्तिं लब्धाऽस्मि सत्तम ॥ १०-३-२९ (६४०८२)
पाञ्चालेषु चरिष्यामि सूदयन्नद्य संयुगे ।
पिनाकपाणिः सङ्क्रुद्धः स्वयं रुद्रः पशुष्विव ॥ १०-३-३० (६४०८३)
अद्याहं सर्वपाञ्चालान्निकृत्या च निकृष्य च ।

अर्दयिष्यामि संहृष्टो रणे पाण्डुसुतांस्तथा ।
ग्सूदयिष्यामि सङ्क्रुद्धः पशूनिव पिनाकधृत्'॥ १०-३-३१ (६४०८४)
अद्याहं सर्वपाञ्चालैः कृत्वा भूमिं शरीरिणीम् ।
प्रहृत्यैकेन शस्त्रेण भविष्याम्यनृणः पितुः ॥ १०-३-३२ (६४०८५)
दुर्योधनस्य कर्णस्य भीष्मसैन्धवयोरपि ।
गमिष्यामि निशावेलां पदवीमद्य दुर्गमाम् ॥ १०-३-३३ (६४०८६)
अद्य पाञ्चालराजस्य धृष्टद्युम्नस्य वै निशि ।
विरात्रे प्रमथिष्यामि पशोरिव शिरो बलात् ॥ १०-३-३४ (६४०८७)
अद्य पाञ्चालपाण्डूनां शयितानां शिरो निशि ।
खड्गेन निशितेनाजौ प्रमथिष्यामि गौतम ॥ १०-३-३५ (६४०८८)
अद्य पाञ्चालसेनां तां निहत्य निशि सौप्तिके ।
कृतकृत्यः सुखी चैव भविष्यामि महामते ॥ ॥ १०-३-३६ (६४०८९)

इति श्रीमन्महाभारते सौप्तिकपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
Mahabharata - Sauptika Parva - Chapter Footnotes

१०-३-४ सर्वोत्मानमित्यत्र सर्व आत्मानमिति च्छेदः । सन्धिरार्षः ॥
१०-३-६ योगे येषां समा गतिरिति झ पाठः । तत्र योगे समुदाये इत्यर्थः ॥
१०-३-१० तां च निन्दन्ति मानवा इति झ पाठः ॥
१०-३-१२ हे भोज हे कृतवर्मन् । एकमेव सम्बोधयन् कृपस्य
वचसि अनादरं सूचयति ॥
१०-३-१३ भवत्यकृतवुद्धित्वादिति झ पाठः । तत्र अकृतधर्मत्वात्
अवसरानुरोधात्। इदानीं मम शान्तिबुद्धिर्न रोचते इत्यर्थः ॥
१०-३-२० क्षत्रियोऽधम इति झ पाठः ॥
१०-३-२२ विदित्वा आश्रित्य ॥
१०-३-२४ गन्तास्मि गमिष्यामि । पदवीं आनृण्यम् ॥
१०-३-३३ गमयिष्यामि पाञ्चालान्पदवीमद्य दुर्गमामिति झ पाठः ॥
१०-३-३ तृतीयोऽध्यायः ॥

सौप्तिकपर्व - अध्याय ००४
॥ श्रीः ॥
१०.४. अध्यायः ४

Mahabharata - Sauptika Parva - Chapter Topics
द्रौणिकृपयोः संवादः ॥ १ ॥

१०-४-० (६४०९०)
कृप उवाच। १०-४-०क्ष् (५२६६)
दिष्ट्या ते प्रतिकर्तव्ये मतिर्जातेयमच्युत ।
न त्वां वारयितुं शक्तो वज्रपाणिरपि स्वयम् ॥ १०-४-१ (६४०९१)
अनुयास्यावहे त्वां तु प्रभाते सहितावुभौ ।
अद्य रात्रौ विश्रमस्व विमुक्तकवचध्वजः ॥ १०-४-२ (६४०९२)
अहं त्वामनुयास्यामि कृतवर्मा च सात्वतः ।
परानभिमुखं यान्तं रथावास्थाय दंशितौ ॥ १०-४-३ (६४०९३)
आवाभ्यां सहितः शत्रूंस्त्वो निहन्ता समागमे ।
विक्रम्य रथिनां श्रेष्ठ पाञ्चालान्सपदानुगान् ॥ १०-४-४ (६४०९४)
शक्तस्त्वमसि विक्रम्य विश्रमस्व निशामिमाम् ।
चिरं ते जाग्रतस्तात स्वप तावन्निशामिमाम् ॥ १०-४-५ (६४०९५)
विश्रान्तश्च विनिद्रश्च स्वस्थचित्तश्च मानद ।
समेत्य समरे शत्रून्वधिष्यसि न संशयः ॥ १०-४-६ (६४०९६)
न हि त्वां रथिनां श्रेष्ठं प्रगृहीतवरायुधम् ।
जेतुमुत्सहते कश्चिदपि देवेषु पावकिः ॥ १०-४-७ (६४०९७)
कृपेण सहितं यान्तं गुप्तं च कृतवर्मणा ।
को द्रौणिं युधि संरब्धं योधयेदपि देवराट् ॥ १०-४-८ (६४०९८)
ते वयं निशि विश्रान्ता विनिद्रा विगतज्वराः ।
प्रभातायां रजन्यां वै निहनिष्याम शात्रवान् ॥ १०-४-९ (६४०९९)
तव ह्यस्त्राणि दिव्यानि मम चैव न संशयः ।
सात्वतोपि महेष्वासो नित्यं युद्धेषु कोविदः ॥ १०-४-१० (६४१००)
ते वयं सहितास्तात सर्वाञ्शत्रून्समागतान् ।
प्रसह्य समरे हत्वा प्रीतिं प्राप्स्याम पुष्कलाम् ॥ १०-४-११ (६४१०१)
विश्रमस्व त्वमव्यग्रः स्वप चेमां निशां सुखम् ।
अहं च कृतवर्मा च प्रभाते त्वां नरोत्तमम् ॥ १०-४-१२ (६४१०२)
अनुयास्याव सहितौ धन्विनौ परतापनौ ।
रथिनं त्वरया यान्तं रथमास्थाय दंशितौ ॥ १०-४-१३ (६४१०३)
स गत्वा शिबिरं तेषां नाम विश्राव्य चाहवे ।
ततः कर्ताऽसि शत्रूणां युध्यतां कदनं महत् ॥ १०-४-१४ (६४१०४)
कृत्वा च कदनं तेषां प्रभाते विमलेऽहनि ।
विहरस्व यथा शक्रः सूदयित्वा महासुरान् ॥ १०-४-१५ (६४१०५)
त्वं हि शक्तो रणे जेतुं पाञ्चालानां वरूथिनीम् ।

दैत्यसेनामिव क्रुद्धः सर्वदानवसूदनः ॥ १०-४-१६ (६४१०६)
मया त्वां सहितं सङ्ख्ये गुप्तं च कृतवर्मणा ।
न सहेत विभुः साक्षाद्वज्रपाणिरपि स्वयम् ॥ १०-४-१७ (६४१०७)
न चाहं समरे तात कृतवर्मा न चैव हि ।
अनिर्जित्य रणे पाण्डूनपयास्यामि कर्हिचित् ॥ १०-४-१८ (६४१०८)
हत्वा च समरे क्षुद्रान्पाञ्चालान्पाण्डुभिः सह ।
निवर्तिष्यामहे सर्वे हता वा स्वर्गगा वयम् ॥ १०-४-१९ (६४१०९)
सर्वोपायैः सहायास्ते प्रभाते वयमाहवे ।
सत्यमेतन्महाबाहो प्रब्रवीमि तवानघ ॥ १०-४-२० (६४११०)
एवमुक्तस्ततो द्रौणिर्मातुलेन हितं वचः ।
अब्रवीन्मातुलं राजन्क्रोधादुद्वृत्य लोचने ॥ १०-४-२१ (६४१११)
आतुरस्य कुतो निद्रा नरस्यामर्षितस्य च ।
अर्थांश्चिन्तयतश्चापि कामयानस्य वा पुनः ॥ १०-४-२२ (६४११२)
तदिदं समनुप्राप्तं पश्य मेऽद्य चतुष्टयम् ।
यस्य भागश्चतुर्थो मे स्वप्नमह्नाय नाशयेत् ॥ १०-४-२३ (६४११३)
किं नाम दुःखं लोकेऽस्मिन्पितुर्वधमनुस्मरन् ।
हृदयं निर्दहन्मेऽद्य रात्र्यहानि न शाम्यति ॥ १०-४-२४ (६४११४)
यथा च निहतः पापैः पिता मम विशेषतः ।
प्रत्यक्षमपि ते सर्वं तन्मे मर्माणि कृन्तति ॥ १०-४-२५ (६४११५)
कथं हि मादृशो लोके मुहूर्तमपि जीवति ।
द्रोणहन्तेति यद्वाचः पाञ्चालानां शृणोम्यहम् ॥ १०-४-२६ (६४११६)
धृष्टद्युम्नमहत्वा तु नादं जीवितुमुत्सहे ।
स मे पितुर्वधाद्वध्यः पाञ्चाला ये च सङ्गताः ॥ १०-४-२७ (६४११७)
विलापो भग्नसक्थस्य यस्तु राज्ञो मया श्रुतः ।
स पुनर्हृदयं कस्य क्रूरस्यापि न निर्दहेत् ॥ १०-४-२८ (६४११८)
कस्य ह्यकरुणस्यापि नेत्राभ्यामश्रु नाव्रजेत् ।
नृपतेर्भग्नसक्थस्य श्रुत्वा तादृग्वचः पुनः ॥ १०-४-२९ (६४११९)
यश्चायं मित्रपक्षो मे मयि जीवति निर्जितः ।
शोकं मे वर्धयत्येष वारिवेग इवार्णवम् ॥ १०-४-३० (६४१२०)
एकाग्रमनसो मेऽद्य कुतो निद्रा कुतः सुखम् ॥ १०-४-३१ (६४१२१)
वासुदेवार्जुनाभ्यां च तानहं परिरक्षितान् ।
अविषह्यतमान्मन्ये महेन्द्रेणापि सत्तम ॥ १०-४-३२ (६४१२२)
न चापि शक्तः संयन्तुमस्मात्कार्यात्कथञ्चन ।
तं न पश्यामि लोकेऽस्मिन्यो मां कोपान्निवर्तयेत् ॥ १०-४-३३ (६४१२३)
इति मे निश्चिता बुद्धिरेषा साधुमता मम ॥ १०-४-३४ (६४१२४)
वादिकैः कथ्यमानस्तु मित्राणां मे पराभवः ।

पाण्डवानां च विजयटो हृदयं दहतीव मे ॥ १०-४-३५ (६४१२५)
अहं तु कदनं कृत्वा शत्रूणामद्य सौप्तिके ।
ततो विश्रमिता चैव स्वप्ता च विगतज्वरः ॥ ॥ १०-४-३६ (६४१२६)

इति श्रीमन्महाभारते सौप्तिकपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
Mahabharata - Sauptika Parva - Chapter Footnotes

१०-४-४ निहन्ता निहनिष्यसि ॥
१०-४-२३ चतुर्थ आतुरादीनां चतुर्णां मध्ये एको भागः अमर्षः । मे
मम स्वप्नं अह्वाय झटिति नाशयेत्। तस्मात् स्वपेत्युक्तं तन्न युज्यते ॥
२३ ॥
१०-४-२४ अनुस्मरन् अनुस्मरतः । न शाम्यति अमर्ष इत्यर्थः ॥
१०-४-३६ स्वप्ता स्वप्स्यामि ॥
१०-४-४ चतुर्थोऽध्यायः ॥

सौप्तिकपर्व - अध्याय ००५
॥ श्रीः ॥
१०.५. अध्यायः ५

Mahabharata - Sauptika Parva - Chapter Topics
कृपेण प्रसुप्तमारणस्याधार्मिकत्वकथनेन प्रतिषेधनेऽपि
पितृवधामर्षिणा द्रौणिना जिघांसया रिपुशिविरद्वारगमनम् ॥ १ ॥
कृपकृतवर्मश्यामपि सौहार्दात्तदनुगमनम् ॥ २ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-५-० (६४१२७)
कृप उवाच। १०-५-०क्ष् (५२६७)
शुश्रूषुरपि दुर्मेधाः पुरुषोऽनियतेन्द्रियः ।
नालं वेदयितुं कृत्स्नौ धर्मार्थाविति मे मतिः ॥ १०-५-१ (६४१२८)
तथैव तावन्मेधावी विनयं यो न शिक्षते ।
न च किञ्चन जानाति सोऽपि धर्मार्थनिश्चयम् ॥ १०-५-२ (६४१२९)
श्चिरं ह्यपि जडः शूरः पण्डितं पर्युपास्य ह ।
न स धर्मान्विजानाति दर्वी सूपरसानिव ॥ १०-५-३ (६४१३०)
मुहूर्तमपि तं प्राज्ञः पण्डितं पर्युपास्य हि ।
क्षिप्रं धर्मान्विजानाति जिह्वा सूपरसानिव ॥ १०-५-४ (६४१३१)

शुश्रूषुस्त्वेव मेधावी पुरुषो नियतेन्द्रियः ।
जानीयादागमान्सर्वान्ग्राह्यं च न विरोधयेत् ॥ १०-५-५ (६४१३२)
अनयस्त्ववमानी यो दुरात्मा पापपूरुषः ।
दिष्टमुत्सृज्य कल्याणं करोति बहुपातकम् ॥ १०-५-६ (६४१३३)
नाथवन्तं तु सुहृदः प्रतिषेधन्ति पातकात् ।
निवर्तते तु लक्ष्मीवान्नालक्ष्मीवान्निवर्तते ॥ १०-५-७ (६४१३४)
यथा ह्युच्चावचैर्वाक्यैः क्षिप्तचित्तो नियम्यते ।
तथैव सुहृदा शक्यो नशक्यस्त्ववसीदति ॥ १०-५-८ (६४१३५)
तथैव सुहृदोऽप्राज्ञान्कुर्वाणान्कर्म पापकम् ।
प्राज्ञाः सम्प्रतिषेधन्ति यथाशक्ति पुनःपुनः ॥ १०-५-९ (६४१३६)
स कल्याणे मनः कृत्वा नियम्यात्मानमात्मना ।
कुरु मे वचनं तात येन पश्चान्न तप्स्यसे ॥ १०-५-१० (६४१३७)
न वधः पूज्यते लोके सुप्तानामिह धर्मतः ।
तथैव न्यस्तशस्त्राणां विमुक्तरथवाजिनाम् ॥ १०-५-११ (६४१३८)
ये व ब्रूयुस्तवास्मीति ये च स्युः शरणागताः ।
विमुक्तमूर्धजा ये च ये चापि हतवाहनाः ॥ १०-५-१२ (६४१३९)
अद्य स्वप्स्यन्ति पाञ्चाला विमुक्तकवचा विभो ।
विश्वस्ता रजनीं सर्वे प्रेता इव विचेतसः ॥ १०-५-१३ (६४१४०)
यस्तेषां तदवस्थानां द्रुह्येत पुरुषोऽनृजुः ।
व्यक्तं स नरके मज्जेदगाधे विपुलेऽप्लुवे ॥ १०-५-१४ (६४१४१)
सर्वास्त्रविदुषां लोके श्रेष्ठस्त्वमसि विश्रुतः ।
न च ते जातु लोकेऽस्मिन्सुसूक्ष्ममपि किल्बिषम् ॥ १०-५-१५ (६४१४२)
त्वं पुनः सूर्यसङ्काशः श्वोभूत उदिते रवौ ।
प्रकाशे सर्वभूतानां विजेता युधि शात्रवान् ॥ १०-५-१६ (६४१४३)
असम्भावितरूपं हि त्वयि कर्म विगर्हितम् ।
शुक्ले रक्तमिव न्यस्तं भवेदिति मतिर्मम ॥ १०-५-१७ (६४१४४)
अश्वत्थामोवाच। १०-५-१८क्ष् (५२६८)
एवमेव यथाऽऽत्थ त्वमनुशाससि मातुल ।
तैस्तु पूर्वमयं सेतुः समन्ताद्विह्वलीकृतः ॥ १०-५-१८ (६४१४५)
प्रत्यक्षं भूमिपालानां भवतां चापि सन्निधौ ।
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ॥ १०-५-१९ (६४१४६)
कर्णश्च पतिते चक्रे उत्थास्यन्रथिनां वरः ।
उत्तमे व्यसने मग्नो हतो गाण्डीवधन्वना ॥ १०-५-२० (६४१४७)
तथा शान्तनवो भीष्मो न्यस्तशस्त्रो निरायुधः ।
शिखण्डिनं पुरस्कृत्य हतो गाण्डीवधन्वना ॥ १०-५-२१ (६४१४८)
भूरिश्रवा महेष्वासस्तथा प्रायगतो रणे ।

क्रोशतां बूमिपालानां युयुधानेन पातितः ॥ १०-५-२२ (६४१४९)
दुर्योधनश्च भीमेन समेत्य गदया मृधे ।
पश्यतां भूमिपालानामधर्मेण निपातितः ॥ १०-५-२३ (६४१५०)
एकाकी बहुभिस्तत्र परिवार्य महारथैः ।
अधर्मेण नरव्याघ्रो भीमसेनेन पातितः ॥ १०-५-२४ (६४१५१)
विलापो भग्नसक्थस्य यो मे राज्ञः परिश्रुतः ।
वादिकानां कथयतां स मे मर्माणि कृन्तति ॥ १०-५-२५ (६४१५२)
एवं चाधार्मिकाः पापाः पाञ्चाला भिन्नसतवः ।
तानेवं भिन्नमर्यादान्किं भवान्न विगर्हति ॥ १०-५-२६ (६४१५३)
पितृहन्तॄनहं हत्वा पाञ्चालान्निशि सौप्तिके ।
कामं कीटः पतङ्गो वा जन्म प्राप्य भवामि वै ॥ १०-५-२७ (६४१५४)
त्वरे चाहमनेनाद्य यदिदं मे चिकीर्षितम् ।
तस्य मे त्वरमाणस्य कुतो निद्रा कुतः सुखम् ॥ १०-५-२८ (६४१५५)
न स जातः पुमाँल्लोके कश्चिन्न स भविष्यति ।
यो मे व्यावर्तयेदेतां वधे तेषां कृतां मतिम् ॥ १०-५-२९ (६४१५६)
सञ्जय उवाच। १०-५-३०क्ष् (५२६९)
एवमुक्त्वा महाराज द्रोणपुत्रः प्रतापवान् ।
एकान्ते योजयित्वाऽश्वान्प्रायादभिमुखः परान् ॥ १०-५-३० (६४१५७)
तमब्रूतां महात्मानौ भोजशारद्वतावुभौ ।
किमयं स्यन्दनो युक्तः किं च कार्यं चिकीर्षितम् ॥ १०-५-३१ (६४१५८)
एकसामर्थ्यप्रयातौ स्वस्त्वया सह नरर्षभ ।
समदुःखसुखौ चापि तस्माच्छंसितुमर्हसि ॥ १०-५-३२ (६४१५९)
अश्वत्थामा तुं सङ्क्रुद्धः पितुर्वधमनुस्मरन् ।
ताभ्यां तथ्यं तथाऽऽचख्यौ यदस्यात्मचिकीर्षितम् ॥ १०-५-३३ (६४१६०)
हत्वा शतसहस्राणि योधानां निशितैः शरैः ।
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ॥ १०-५-३४ (६४१६१)
तं तथैव वधिष्यामि न्यस्तवर्माणमद्य वै ।
पुत्रं पाञ्चालराजस्य पापं पापेन कर्मणा ॥ १०-५-३५ (६४१६२)
तथा विनिहतः पापः पाञ्चाल्यः पशुवन्मया ।
शस्त्रेण विजिताँल्लोकान्नाप्नुयादिति मे मतिः ॥ १०-५-३६ (६४१६३)
क्षिप्रं सन्नद्धकवचौ सखड्गावात्तकार्मुकौ ।
मामेवाद्य प्रतीक्षेतां रथवर्यौ परन्तपौ ॥ १०-५-३७ (६४१६४)
इत्युक्त्वा रथमास्थाय प्रायादभिमुखः परान् ।
तमन्वगात्कृपो राजन्कृतवर्मा च सात्वतः ॥ १०-५-३८ (६४१६५)
ते प्रयाता व्यरोचन्त परानभिमुखास्त्रयः ।
हूयमाना यथा यज्ञे समिद्धा हव्यवाहनाः ॥ १०-५-३९ (६४१६६)

ययुश्च शिबिरं तेषां सम्प्रसुप्तजनं विभो ।
द्वारदेशमनुप्राप्य द्रौणिस्तस्थौ महारथः ॥ ॥ १०-५-४० (६४१६७)

इति श्रीमन्महाभारते सौप्तिकपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

Mahabharata - Sauptika Parva - Chapter Footnotes

१०-५-१ अशुश्रूषुः सुदुर्मेधा इति ङ पाठः । दुर्मेधाः
मूढः। अनियतेतिच्छेदः ॥
१०-५-६ अनेय इति झ पाठः । तत्र अनेयः सन्मार्गं
नेतुमशक्यः। दिष्टमुपदिष्टम् ॥
१०-५-८ उच्चावचैः सर्गैरिति क छ पाठः ॥
१०-५-१४ अप्लवे इति च्छेदः ॥
१०-५-२३ अधर्मेण नाभेरधस्तात्प्रहारेण ॥
१०-५-३२ नावां शङ्कितुमर्हसीति झ पाठः ॥
१०-५-३६ शस्त्राग्निवर्जिताँल्लोकान्प्राप्नुयादिति मे मतिः इति ङ पाठः ॥
१०-५-५ पञ्चमोऽध्यायः ॥

सौप्तिकपर्व - अध्याय ००६
॥ श्रीः ॥
१०.६. अध्यायः ६

Mahabharata - Sauptika Parva - Chapter Topics

अश्वत्थाम्नः शिबिरद्वारस्थमहाभूतदर्शनम् ॥ १ ॥
भूतजिगीषया द्रौणिविसृष्टानामस्त्रशस्त्राणां भूतेन ग्रसनम् ॥ २ ॥
ततश्चिंतातान्तस्य द्रौणेर्महादेवोपासनाध्यवसायः ॥ ३ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-६-० (६४१६८)
धृतराष्ट्र उवाच। १०-६-०क्ष् (५२७०)
द्वारदेशे ततो द्रौणिमवस्थितमवेक्ष्य तौ ।
अकुर्वतां भोजकृपौ किं सञ्जय वदस्व मे ॥ १०-६-१ (६४१६९)
सञ्जय उवाच। १०-६-२क्ष् (५२७१)
कृतवर्माणमामन्त्र्य कृपं च स महारथः ।
द्रौणिर्मन्युपरीतात्मा शिबिरद्वारमासदत् ॥ १०-६-२ (६४१७०)
तत्र भूतं महाकायं चन्द्रार्कसदृशद्युतिम् ।

सोऽपश्यद्द्वारमावृत्य तिष्ठन्तं रोमहर्षणम् ॥ १०-६-३ (६४१७१)
वसानं चर्म वैयाघ्रं वसारुधिरविस्रवम् ।
कृष्णाजिनोत्तरासङ्गं नागयज्ञोपवीतिनम् ॥ १०-६-४ (६४१७२)
बाहुभिः स्वायतैर्भीमैर्नानाप्रहरणोद्यतैः ।
बद्धाङ्गदमहासर्पं ज्वालामालाकुलाननम् ॥ १०-६-५ (६४१७३)
दंष्ट्राकरालवदनं व्यादितास्यं भयानकम् ।
नयनानां सहस्रैश्च विचित्रैरभिभूषितम् ॥ १०-६-६ (६४१७४)
नैव तस्य वपुः शक्यं प्रवक्तुं वेष एव च ।
सर्वथा तु तदालक्ष्य स्फुटेयुरपि पर्वताः ॥ १०-६-७ (६४१७५)
तस्यास्यनासिकाभ्यां च श्रवणाभ्यां च सर्वशः ।
तेभ्यश्चाक्षिसहस्रेभ्यः प्रादुरासन्महार्चिषः ॥ १०-६-८ (६४१७६)
तथा तेजोमरीचिभ्यः शङ्खचक्रगदाधराः ।
प्रादुरासन्हृषीकेशाः शतशोऽथ सहस्रशः ॥ १०-६-९ (६४१७७)
तदत्यद्भुतमालोक्य भूतं लोकभयङ्करम् ।
द्रौणिरव्यथितो दिव्यैरस्त्रवर्षैरवाकिरत् ॥ १०-६-१० (६४१७८)
द्रौणिमुक्ताञ्छरांस्तांस्तु तद्भूतं महदग्रसत् ।
उदधेरिव वार्योघान्पावको बडबामुखः ॥ १०-६-११ (६४१७९)
अश्वत्थामा तु सम्प्रेक्ष्य शरौघांस्तान्निरर्थकान् ।
रथशक्तिं मुमोचास्मै दीप्तामग्निशिखामिव ॥ १०-६-१२ (६४१८०)
सा तमाहत्य दीप्ताग्रा रथशक्तिरदीर्यत ।
युगान्ते सूर्यमाहत्य महोल्केव दिवश्च्युता ॥ १०-६-१३ (६४१८१)
अथ हेमत्सरुं दिव्यं खड्गमाकाशवर्चसम् ॥
कोशात्समुद्बबर्हाशु बिलाद्दीप्तमिवोरगम् ॥ १०-६-१४ (६४१८२)
ततः खड्गवरं धीमान्भूताय प्राहिणोत्तदा ।
स तदासाद्य भूतं वै विलयं तूलवद्ययौ ॥ १०-६-१५ (६४१८३)
ततः स कुपितो द्रौणिरिन्द्रकेतुनिभां गदाम् ।
ज्वलन्तीं प्राहिणोत्तस्मै भूतं तामपि चाग्रसत् ॥ १०-६-१६ (६४१८४)
ततः सर्वायुधाभावे वीक्षमाणस्ततस्ततः ।
अपश्यत्कृतमाकाशमनाकाशं जनार्दनैः ॥ १०-६-१७ (६४१८५)
तदद्भुततमं दृष्ट्वा द्रोणपुत्रो निरायुधः ।
अचिन्तयत्सुसन्त्रस्तः कृपभोजवचः स्मरन् ॥ १०-६-१८ (६४१८६)
ब्रुवतामप्रियं पथ्यं सुहृदां न शृणोति यः ।
स शोचत्यापदं प्राप्य थाऽहमवमत्य तौ ॥ १०-६-१९ (६४१८७)
शास्त्रदृष्टानविद्वान्यः समतीत्य जिघांसति ।
स पथः प्रच्युतो धर्म्यात्कुपथे प्रतिहन्यते ॥ १०-६-२० (६४१८८)
गोब्राह्मणनृपस्त्रीषु सख्युर्मातुर्गुरोस्तथा ।

वृद्धबालजडान्धेषु सुप्तभीतोत्थितेषु च ॥ १०-६-२१ (६४१८९)
मत्तोन्मत्तप्रमत्तेषु न शस्त्राणि च मातयेत् ।
इत्येवं गुरुभिः पूर्वमुपदिष्टं नृणां सदा ॥ १०-६-२२ (६४१९०)
सोऽहमुत्क्रम्य पन्थानं शास्त्रदृष्टं सनातनम् ।
अमार्गेणैवमारभ्य घोरामापदमागतः ॥ १०-६-२३ (६४१९१)
तां चापदं घोरतरां प्रवदन्ति मनीषिणः ।
यदुद्यम्य महत्कृत्यं भयादपि निवर्तते ॥ १०-६-२४ (६४१९२)
अशक्यं चैव कः कर्तुं शक्तः शक्तिबलादिह ।
न हि दैवाद्गरीयो वै मानुष्यं किञ्चिदिष्यते ॥ १०-६-२५ (६४१९३)
मानुष्यं कुर्वतः कर्म यदि दैवान्न सिध्यति ।
स पथः प्रच्युतो धर्म्याद्विपदं प्रतिपद्यते ॥ १०-६-२६ (६४१९४)
प्रतिज्ञानं ह्यविज्ञानं प्रवदन्ति मनीषिणः ।
यदारभ्य क्रियां काञ्चिद्भयादिह निवर्तते ॥ १०-६-२७ (६४१९५)
तदिदं दुष्प्रणीतेन भयं मा समुपस्थितम् ।
न हि द्रोणसुतः सङ्ख्ये निवर्तेत कथञ्चन ॥ १०-६-२८ (६४१९६)
इदं च सुमहद्भूतं दैवदण्डमिवोद्यतम् ।
न चैतदभिजानामि चिन्तयन्नपि सर्वथा ॥ १०-६-२९ (६४१९७)
ध्रुवं येयमधर्मेण प्रहिता कलुषा मतिः ।
तस्याः फलमिदं घोरं प्रतिघाताय कल्पते ॥ १०-६-३० (६४१९८)
तदिदं दैवविहितं मम सङ्ख्ये निवर्तनम् ।
नान्यत्र दैवादुद्यन्तुमिह शक्यं कथञ्चन ॥ १०-६-३१ (६४१९९)
सोऽहमद्य महादेवं प्रपद्ये शरणं विभुम् ।
दैवदण्डमिमं घोरं स हि मे नाशयिष्यति ॥ १०-६-३२ (६४२००)
कपर्दिनं प्रपद्येऽहं देवदेवमुमापतिम् ।
कपालमालिनं रुद्रं भगनेत्रहरं हरम् ॥ १०-६-३३ (६४२०१)
स हि देवोऽत्यगाद्देवांस्तपसा विक्रमेण च ।
तस्माच्छरणमभ्येष्ये गिरिशं शूलपाणिनम् ॥ ॥ १०-६-३४ (६४२०२)

इति श्रीमन्महाभारते सौप्तिकपर्वणि षष्ठोऽध्यायः ॥ ६ ॥

Mahabharata - Sauptika Parva - Chapter Footnotes

१०-६-१२ रथशक्तिं चक्रम् ॥
१०-६-१३ युग्मान्ते सूर्यमिति झ पाठः तत्र युग्मान्ते मिथुनराशेरन्ते अतिदीप्तं इत्यर्थः ॥
१०-६-१५ विलं नकुलवद्ययौ इति झ पाठः ॥
१०-६-१७ अनाकाशं निरवकाशम् ॥

१०-६-६ षष्ठोऽध्यायः ॥

सौप्तिकपर्व - अध्याय ००७
॥ श्रीः ॥
१०.७. अध्यायः ७

Mahabharata - Sauptika Parva - Chapter Topics
द्रौणिना शिवस्तुतिः ॥ १ ॥
द्रौणेः पुरतः काञ्चनवेद्यामग्न्युद्भवः ॥ २ ॥
द्रौणेः समीपे नानाविधभीषणभूतगणानामागमनम् ॥ ३ ॥
शिवेन आत्मनो हविष्ट्वकल्पनपूर्वकमग्नौ प्रविष्टाय द्रौणये
खड्गदानपूर्वकं तच्छरीरप्रवेशः ॥ ४ ॥
पुनरश्वत्थाम्नः शिबिरगमनम् ॥ ५ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-७-० (६४२०३)
सञ्जय उवाच। १०-७-०क्ष् (५२७२)
एवं सञ्चिन्तयित्वा तु द्रोणपुत्रो विशाम्पते ।
अवतीर्य रथोपस्थाद्दध्यौ स प्रयतः स्थितः ॥ १०-७-१ (६४२०४)
द्रौणिरुवाच। १०-७-२क्ष् (५२७३)
उग्रं स्थाणुं शिवं रुद्रं शर्वमीशानमीश्वरम् ।
गिरिशं वरदं देवं भवभावनमव्ययम् ॥ १०-७-२ (६४२०५)
शितिकण्ठमजं रुद्रं दक्षक्रतुहरं हरम् ।
विश्वरूपं विरूपाक्षं बहुरूपमुमापतिम् ॥ १०-७-३ (६४२०६)
श्मशानवासिनं दृप्तं महागणपतिं विभुम् ।
खट्वाङ्गधारिणं मुण्डं जटिलं ब्रह्मचारिणम् ॥ १०-७-४ (६४२०७)
मनसा ह्यनुचिन्त्यैनं दुष्करेणाल्पचेतसा ।
अद्य भूतोपहारेण यक्ष्ये त्रिपुराघातिनम् ॥ १०-७-५ (६४२०८)
क्षक्स्तुतं स्तुत्यं स्तूयमानममोघं कृत्तिवाससम् ।
विलोहितं नीलकण्ठमसह्यं दुर्निवारणम् ॥ १०-७-६ (६४२०९)
शुक्रं विश्वसृजं ब्रह्म ब्रह्मचारिणमेव च ।
व्रतवन्तं तपोनिष्ठमनन्तं तपतां गतिम् ॥ १०-७-७ (६४२१०)
बहुरूपं गणाध्यक्षं त्र्यक्षं पारिषदप्रियम् ।
धनाध्यक्षप्रियसखं गौरीहृदयवल्लभम् ॥ १०-७-८ (६४२११)
कुमारपितरं पिङ्गं गोवृषोत्तमवाहनम् ।

कृत्तिवाससमत्युग्रमातोषणतत्परम् ॥ १०-७-९ (६४२१२)
परं परेभ्यः परमं परं यस्मान्न विद्यते ।
इष्वस्त्रोत्तमभर्तारं दिगन्तं देशरक्षिणम् ॥ १०-७-१० (६४२१३)
हिरण्यकवचं देवं चन्द्रमौलिविभूषणम् ।
प्रपद्ये शरणं देवं परमेण समाधिना ॥ १०-७-११ (६४२१४)
इमां चेदापदं घोरां तराम्यद्य सुदुस्तराम् ।
सर्वभूतोपहारेण यक्ष्येऽहं शुचिना शुचिम् ॥ १०-७-१२ (६४२१५)
इति तस्य व्यवसितं ज्ञात्वा योगात्सुकर्मणः ।
पुरस्तात्काञ्चनी वेदी प्रादुरासीन्महात्मनः ॥ १०-७-१३ (६४२१६)
तस्यां वेद्यां तदा राजंश्चित्रभानुरजायत ।
स दिशो विदिशः खं च ज्वालाभिरिव पूरयन् ॥ १०-७-१४ (६४२१७)
दीप्तास्यनयनाश्चात्र नैकपादशिरोधराः ।
शरत्नचित्राङ्गदधराः समुद्यतकरास्तथाः ॥ १०-७-१५ (६४२१८)
द्विपाः शैलप्रतीकाशाः प्रादुरासन्महागणाः ।
श्ववराहोष्ट्ररूपाश्च हयगोमायुगोमुखाः ॥ १०-७-१६ (६४२१९)
ऋक्षमार्जारवदना व्याघ्रद्वीपिमुखास्तथा ।
काकवक्त्राः प्लुवमुखाः शुकवक्त्रास्तथैव च ॥ १०-७-१७ (६४२२०)
महाजगरवक्त्राश्च हंसवक्त्राः शितप्रभाः ।
दार्वाघाटमुखाश्चापि चाषवक्त्राश्च भारत ॥ १०-७-१८ (६४२२१)
कूर्मनक्रमुखाश्चैव शिंशुमारमुखास्तथा ।
महामकरवक्त्राश्च तिमिवक्त्रास्तथैव च ॥ १०-७-१९ (६४२२२)
हरिवक्त्राः क्रौञ्चमुखाः कपोताभमुखास्तथा ।
पारावतमुखाश्चैव मद्गुवक्त्रास्तथैव च ॥ १०-७-२० (६४२२३)
पाणिकर्णाः सहस्राक्षास्तथैव च महोदराः ।
निर्मांसाः काकवक्त्राश्च श्येनवक्त्राश्च भारत ॥ १०-७-२१ (६४२२४)
तथैवाशिरसो राजन्नृक्षवक्त्राश्च भीषणाः ।
प्रदीप्तनेत्रजिह्वाश्च ज्वालावर्णास्तथैव च ॥ १०-७-२२ (६४२२५)
ज्वालाकेशाश्च राजेन्द्र ज्वलद्रोमचतुर्भुजाः ।
मेषवक्त्रास्तथैवान्ये तथा छागमुखा नृप ॥ १०-७-२३ (६४२२६)
शङ्खाभाः शङ्खवक्त्राश्च शङ्खवर्णास्तथैव च ।
शङ्खमालापरिकराः शङ्खध्वनिसमस्वनाः ॥ १०-७-२४ (६४२२७)
जटाधराः पञ्चशिखास्तथा मुण्डाः कृशोदराः ।
चतुर्दंष्ट्राश्चतुर्जिह्वाः शङ्कुकर्णाः किरीटिनः ॥ १०-७-२५ (६४२२८)
मौञ्जीधराश्च राजेन्द्र तथा कुञ्चितमूर्धजाः ।
उष्णीषिणः कुण्डलिनश्चारुवक्त्राः स्वलङ्कृताः ॥ १०-७-२६ (६४२२९)
पद्मोत्पलापीडधरास्तथा मुकुटधारिणः ।

महात्म्येन च संयुक्ताः शतशोऽथ सहस्रशः ॥ १०-७-२७ (६४२३०)
शतघ्नीचक्रहस्ताश्च तथा मुसलपाणयः ।
भुशुण्डीपाशहस्ताश्च दण्डहस्ताश्च भारत ॥ १०-७-२८ (६४२३१)
पृष्ठेषु बद्धेषुधयश्चित्रबाणोत्कटास्तथा ।
सध्वजाः सपताकाश्च सघण्टाः सपरश्वथाः ॥ १०-७-२९ (६४२३२)
महापाशोद्यतकरास्तथा लगुडपाणयः ।
स्थूणाहस्ताः खड्गहस्ताः सर्पोच्छ्रितकिरीटिनः ॥ १०-७-३० (६४२३३)
महासर्पाङ्गदधराश्चित्राभरणधारिणः ।
रजोध्वजाः पङ्कदिग्धाः सर्वे चित्राम्बरस्रजः ।
नीलाङ्गाः पिङ्गलाङ्गाश्च मुण्डवक्तास्तथैव च ॥ १०-७-३१ (६४२३४)
भेरीशङ्खमृदङ्गांश्च झर्झरानकगोमुखान् ।
अवादयन्पारिषदाः प्रहृष्टाः कनकप्रभाः ॥ १०-७-३२ (६४२३५)
गायमानास्तथैवान्ये संहृष्टाः पुरुषर्षभाः ।
लङ्घयन्तः प्लुवन्तश्च वल्गन्तश्च महारथाः ॥ १०-७-३३ (६४२३६)
धावन्तो जवनाश्चण्डाः पावकोद्धूतमूर्धजाः ।
मत्ता इव महानागा विनदन्तो मुहुर्मुहुः ॥ १०-७-३४ (६४२३७)
सुभीमा घोररूपाश्च शूलपट्टसपाणयः ।
नानाविरागवसनाश्चित्रमाल्यानुलेपनाः ॥ १०-७-३५ (६४२३८)
रत्नचित्राङ्गदधराः समुद्यतकरास्तथा ।
हन्तारो द्विषतां शूराः प्रसह्यासह्यविक्रमाः ॥ १०-७-३६ (६४२३९)
पातारोऽसृग्वसाज्यानां मांसान्त्रकृतभोजनाः ।
चूडालाः कर्णिकाराश्च प्रहृष्टाः पिठरोदराः ॥ १०-७-३७ (६४२४०)
अतिह्रस्वातिदीर्घाश्च प्रलम्बाश्चातिभैरवाः ।
विकटाः काललंबोष्ठा बृहच्छेफाण्डपिण्डिकाः ॥ १०-७-३८ (६४२४१)
महार्हनानाविकटा मुण्डाश्च जटिलाः परे ।
सार्केन्दुग्रहनक्षत्रां द्यां कुर्युस्ते महीतले ॥ १०-७-३९ (६४२४२)
उत्सहेरंश्च ये हन्तुं भूतग्रामं चतुर्विधम् ।
ये च वीतभया नित्यं हरस्य भ्रुकुटीसहाः ॥ १०-७-४० (६४२४३)
कामकारकरा नित्यं त्रैलोक्यस्येश्वरेश्वराः ।
नित्यानन्दप्रमुदिता वागीशा वीतमत्सराः ॥ १०-७-४१ (६४२४४)
प्राप्याष्टगुणमैश्वर्यं ये न यास्यन्ति वै स्मयम् ।
येषां विस्मयते नित्यं भगवान्कर्मभिर्हरः ॥ १०-७-४२ (६४२४५)
मनोवाक्कर्मभिर्युक्तैर्नित्यमाराधितश्च यैः ।
मनोवाक्कर्मभिर्भक्तान्पाति पुत्रानिवौरसान् ॥ १०-७-४३ (६४२४६)
पिबन्तोऽसृग्वसाश्चान्ये क्रुद्धा ब्रह्मद्विषां सदा ।
चतुर्विधात्मकं सोमं ये पिबन्ति च सर्वदा ॥ १०-७-४४ (६४२४७)

श्रुतेन ब्रह्मचर्येण तपसा च दमेन च ।
ये समाराध्य शूलाङ्कं भवसायुज्यमागताः ॥ १०-७-४५ (६४२४८)
यैरात्मभूतैर्भगवान्पार्वत्या च महेश्वरः ।
महाभूतगणैर्भुङ्क्ते भूतभव्यभवत्प्रभुः ॥ १०-७-४६ (६४२४९)
नानावादित्रहसितक्ष्वेडितोत्कृष्टगर्जितैः ।
सन्त्रासयन्तस्ते विश्वमश्वत्थामानमभ्ययुः ॥ १०-७-४७ (६४२५०)
संस्तुवन्तो महादेवं भाः कुर्वाणाः सुवर्चसः ।
विवर्धयिषवो द्रौणेर्महिमानं महात्मनः ॥ १०-७-४८ (६४२५१)
जिज्ञासमानास्तत्तेजः सौप्तिकं च दिदृक्षवः ।
भीमोग्रपरिघालातशूलपट्टसपाणयः ।
घोररूपाः समाजग्मुर्भूतसङ्घाः सहस्रशः ॥ १०-७-४९ (६४२५२)
जनयेयुर्भयं ये स्म त्रैलोक्यस्यापि दर्शनात् ।
न च तान्प्रेक्षमाणोऽपि व्यथामुपजगाम ह ॥ १०-७-५० (६४२५३)
अथ द्रौणिर्धनुष्पाणिर्बद्धगोधाङ्गुलित्रवान् ।
स्वयमेवात्मनात्मानमुपहारमुपाहरत् ॥ १०-७-५१ (६४२५४)
धनूंषि समिधस्तत्र पवित्राणि सिताः शराः ।
हविरात्मवतश्चात्मा तस्मिन्भारत कर्मणि ॥ १०-७-५२ (६४२५५)
ततः सौम्येन मन्त्रेण द्रोणपुत्रः प्रतापवान् ।
उपहारं महामन्युरथात्मानमुपाहरत् ॥ १०-७-५३ (६४२५६)
तं रुद्रं रौद्रकर्माणं रौद्रैः कर्मभिरच्युतम् ।
अभिष्टुत्य महात्मानमित्युवाच कृताञ्जलिः ॥ १०-७-५४ (६४२५७)
द्रौणिरुवाच। १०-७-५५क्ष् (५२७४)
इममात्मानमद्याहं जातमाङ्गिरसे कुले ।
स्वग्नौ जुहोमि भगवन्प्रतिगृह्णीष्व मां बलिम् ॥ १०-७-५५ (६४२५८)
भवद्भक्त्या महादेव पस्मेण समाधिना ।
अस्यामापदि विश्वात्मन्नुपाकुर्मी तवाग्रतः ॥ १०-७-५६ (६४२५९)
त्वयि सर्वाणि भूतानि सर्वभूतेषु चासि वै ।
गुणानां हि प्रधानानां कैवल्यं त्वयि तिष्ठति ॥ १०-७-५७ (६४२६०)
सर्वभूताश्रय विभो हविर्भूतमवस्थितम् ।
प्रतिगृहाण मां देव यद्यशक्याः परे मया ॥ १०-७-५८ (६४२६१)
इत्युक्त्वा द्रौणिरास्थाय तां देवीं दीप्तपावकाम् ।
सन्त्यज्यात्मानमारुह्य कृष्णवर्त्मन्युपाविशत् ॥ १०-७-५९ (६४२६२)
तमूर्ध्वबाहुं निश्चेष्टं दृष्ट्वा हविरुपस्थितम् ।
अब्रवीद्भगवान्साक्षान्महादेवो हसन्निव ॥ १०-७-६० (६४२६३)
सत्यशौचार्जवत्यागैस्तपसा नियमेन च ।
क्षान्त्या भक्त्या च धृत्या च कर्मणा मनसा गिरा ॥ १०-७-६१ (६४२६४)

यथावदहमाराद्धः कृष्णेनाक्लिष्टकर्मणा ।
तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते ॥ १०-७-६२ (६४२६५)
कुर्वता तात सम्मानं त्वां च जिज्ञासता मया ।
पाञ्चालाः सर्वदा गुप्ता मायाश्च बहुशः कृताः ॥ १०-७-६३ (६४२६६)
कृतस्तस्यैव सम्मानं पाञ्चालान्रक्षता मया ।
अभिभूतास्तु कालेन नैषामद्यास्ति जीवितम् ॥ १०-७-६४ (६४२६७)
एवमुक्त्वा महात्मानं भगवानात्मनस्तनुम् ।
आविवेश ददौ चास्मै विमलं खड्गमुत्तमम् ॥ १०-७-६५ (६४२६८)
अथाविष्टो भगवता भूयो जज्वाल तेजसा ।
वेगवांश्चाभवद्युद्धे देवसृष्टेन तेजसा ॥ १०-७-६६ (६४२६९)
तं दृष्ट्वा तानि भूतानि रक्षांसि च समाद्रवन् ।
अभितः शिबिरं यान्तं द्रोणपुत्रं महारथम् ।
देवदेवं हरं स्थाउं यान्तं साक्षादिवेश्वरम् ॥ ॥ १०-७-६७ (६४२७०)

इति श्रीमन्महाभारते सौप्तिकपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

Mahabharata - Sauptika Parva - Chapter Footnotes

१०-७-१ रथोपस्थाद्दध्यौ स प्रयतः स्थितः इति क पाठः ॥
१०-७-५ सोऽहमात्मोपहारेणेति झ पाठः ॥
१०-७-९ उमाभूषणतत्परमिति झ पाठः ॥
१०-७-११ हिरण्यदण्डकवचं चारुमौलिविभूषणमिति क पाठः ॥
१०-७-१७ प्लुवमुखाः मण्डूकवक्त्राः ॥
१०-७-१८ दार्वाघाटः पक्षिविशेषः । महागजसवकाश्चेति क पाठः ॥
१०-७-३८ पिण्डिका जानुनोरधः---पश्चाद्भागः ॥
१०-७-५३ सौम्येन सोमदैवत्येन मन्त्रेण ॥
१०-७-७ सप्तमोऽध्यायः ॥

सौप्तिकपर्व - अध्याय ००८

॥ श्रीः ॥

१०.८. अध्यायः ८

Mahabharata - Sauptika Parva - Chapter Topics

शिबिरद्वारे कृपकृतवर्माणौ संस्थाप्यान्तः प्रविष्टेन द्रौणिना
धृष्टद्युम्नादिपाञ्चालानां द्रौपदेयादीनां च वधः ॥ १ ॥
भयाद्बहिर्निष्क्रान्तानां कृपकृतवर्मभ्यां वधः ॥ २ ॥

१०-८-० (६४२७१)
धृतराष्ट्र उवाच। १०-८-०क्ष् (५२७५)
तथा प्रयाते शिबिरं द्रोणपुत्रे महारथे ।
कच्चित्कृपश्च भोजश्च भयार्तौ न व्यवर्तताम् ॥ १०-८-१ (६४२७२)
कच्चिन्न वारितौ क्षुद्रौ रक्षिभिर्नोपलक्षितौ ।
असह्यमिति मन्वानौ न निवृत्तौ महारथौ ॥ १०-८-२ (६४२७३)
कच्चिदुन्मथ्य शिबिरं हत्वा सोमकपाण्डवान् ।
ग्कृता प्रतिज्ञा सफला कच्चित्सञ्जय सा निशि'॥ १०-८-३ (६४२७४)
दुर्योधनस्य पदवीं कच्चित्परमिकां रणे ।
ग्गत्वातिष्ठदसौ द्रौणिः कृत्वा कर्म सुदुष्करम् ॥ १०-८-४ (६४२७५)
धृष्टद्युम्नशिखण्डिभ्यां द्रौपद्याश्च सुतैः किल ।
सञ्छन्ना मेदिनी सुप्तैर्निहतैः पाण्डुसैनिकैः ॥ १०-८-५ (६४२७६)
पाञ्चालैर्वा विनिहतैः शयानै रुधिरोक्षितैः ।
कच्चिन्महीतलं छन्नं तन्ममाचक्ष्व सञ्जय'॥ १०-८-६ (६४२७७)
श्पाञ्चालैर्निहतौ वीरौ कच्चित्तु स्वपतां क्षितौ ।
कच्चित्ताभ्यां कृतं कर्म तन्ममाचक्ष्व सञ्जय ।॥ १०-८-७ (६४२७८)
सञ्जय उवाच। १०-८-८क्ष् (५२७६)
तस्मिन्प्रयाते शिबिरं द्रोणपुत्रे महात्मनि ।
कृपश्च कृतवर्मा च द्रौणिमेवाभ्यवर्तताम् ॥ १०-८-८ (६४२७९)
अश्वत्थामा तु तौ दृष्ट्वा यत्नवन्तौ महारथौ ।
प्रहृष्टः शनकै राजन्निदं वचनमब्रवीत् ॥ १०-८-९ (६४२८०)
यत्तौ भवन्तौ पर्याप्तौ सर्वक्षत्रस्य नाशने ।
किम्पुनर्योधशेषस्य प्रसुप्तस्य विशेषतः ॥ १०-८-१० (६४२८१)
अहं प्रवेक्ष्ये शिबिरं चरिष्यामि च कालवत् ।
यथा न कश्चिदपि वां जीवन्मुच्येत मानवः ।
तथा भवद्भ्यां कार्यं स्यादिति मे निश्चिता मतिः ॥ १०-८-११ (६४२८२)
इत्युक्त्वा प्राविशद्द्रौणिः पार्थानां शिबिरं महत् ।
अद्वारेणाभ्यवस्कन्द्य विहाय भयमात्मनः ॥ १०-८-१२ (६४२८३)
स प्रविश्य महाबाहुरुद्देशज्ञश्च तस्य ह ।
ग्द्रौणिः परमसङ्क्रुद्धस्तेजसा प्रज्वलन्निव ।
ततः पर्यचरत्सर्वं सम्प्रसुप्तं जनं निशि'॥ १०-८-१३ (६४२८४)
धृष्टद्युम्नस्य निलयं शनकैरभ्युपागमत् ॥ १०-८-१४ (६४२८५)
ते तु कृत्वा महत्कर्म श्रान्ताश्च बलवद्रणे ।
प्रसुप्ता वै सुविश्वस्ताः स्वसैन्यपरिवारिताः ॥ १०-८-१५ (६४२८६)

अथ प्रविश्य तद्वेश्म धृष्टद्युम्नस्य भारत ।
पाञ्चाल्यं शयने द्रौणिरपश्यत्सुप्तमन्तिकात् ॥ १०-८-१६ (६४२८७)
क्षौमावदाते महति स्पर्द्ध्यास्तरणसंवृते ।
माल्यप्रवरसंयुक्ते धूपैश्चूर्णैश्च वासिते ॥ १०-८-१७ (६४२८८)
तं शयानं महात्मानं विस्रब्धमकुतोभयम् ।
अपोथयत पादेन शयनस्थं महीपते ॥ १०-८-१८ (६४२८९)
सम्बुध्य चरणस्पर्शादुत्थाय रणदुर्मदः ।
अभ्यजानादमेयात्मा द्रोणपुत्रं महारथम् ॥ १०-८-१९ (६४२९०)
तमुत्पतन्तं शयनादश्वत्थामा महाबलः ।
केशेष्वालभ्य पाणिभ्यां निष्पिपेष महीतले ॥ १०-८-२० (६४२९१)
स बलात्तेन निष्पिष्टः साध्वसेन च भारत ।
अभ्याक्रान्तश्च निद्रान्धो नाशकच्चेष्टितुं तदा ॥ १०-८-२१ (६४२९२)
ग्निष्पिष्य तु ततो भूमौ पाञ्चाल्यं द्रौणिरञ्जसा ।
धनुषो ज्यां विमुच्याशु क्रूरबुद्धिरमर्षणः ॥ १०-८-२२ (६४२९३)
तस्य कण्ठेऽथ बद्धवा तां त्वरितः क्रोधमूर्च्छितः ।'
द्रौणिः क्रूरं मनः कृत्वा पाञ्चाल्यमवधीत्तदा ॥ १०-८-२३ (६४२९४)
तमाक्रम्य पदा राजन्कण्ठे चोरसि पादयोः ।
तदन्तं विस्फुरन्तं च पशुमारममारयत् ॥ १०-८-२४ (६४२९५)
ग्स वार्यमाणस्तरसा बलाद्बलवता बली'।
तुदन्नखैस्तु स द्रौणिं नातिव्यक्तमुदाहरत् ॥ १०-८-२५ (६४२९६)
आचार्यपुत्र शस्त्रेण जहि मां मा चिरं कृथाः ।
त्वत्कृते सुकृतां लोकान्गच्छेयं द्विपदांवर ॥ १०-८-२६ (६४२९७)
एवमुक्त्वा तु वचनं विरराम परन्तपः ।
सुतः पाञ्चालराजस्य आक्रान्तो बलिना भृशम् ॥ १०-८-२७ (६४२९८)
तस्याव्यक्तां तु तां वचं संश्रुत्य द्रौणिरब्रवीत् ।
आचार्यघातिनां लोका न सन्ति कुलपांसन ।
तस्माच्छस्त्रेण निधनं न त्वमर्हसि दुर्मते ॥ १०-८-२८ (६४२९९)
ग्नृशंसेनातिवृत्तेन त्वया मे निहतः पिता ।
तस्मात्त्वमपि वध्यश्च नृशंसेन नृशंसकृत् ॥' १०-८-२९ (६४३००)
एवं ब्रुवाणस्तं वीरं सिंहो मत्तमिव द्विपम् ।
मर्मस्वभ्यवधीत्क्रुद्धः पादघातैः सुदारुणैः ॥ १०-८-३० (६४३०१)
तस्य वीरस्य शब्देन मार्यमाणस्य वेश्मनि ।
अबुध्यन्त महाराज स्त्रियो ये चास्य रक्षिणः ॥ १०-८-३१ (६४३०२)
ते दृष्ट्वा धर्षयन्तं तमतिमानुषविक्रमम् ।
भूतमित्यध्यवस्यन्तो न स्म प्रव्याहरन्भयात् ॥ १०-८-३२ (६४३०३)
तं तु तेनाभ्युपायेन गमयित्वा यमक्षयम् ।

अध्यतिष्ठत तेजस्वी रथं प्राप्य सुदर्शनम् ॥ १०-८-३३ (६४३०४)
स तस्य भवनाद्राजन्निष्क्रम्यानादयन्दिशः ।
रथेन शिबिरं प्रायाज्जिघांसुर्द्विषतो बली ॥ १०-८-३४ (६४३०५)
अपक्रान्ते ततस्तस्मिन्द्रोणपुत्रे महारथे ।
सहितैः रक्षिभिः सर्वैः प्राणेदुर्योषितस्तदा ॥ १०-८-३५ (६४३०६)
राजानं निहतं दृष्ट्वा भृशं शोकपरायणाः ।
व्याक्रोशन्क्षत्रियाः सर्वे धृष्टद्युम्नस्य भारत ॥ १०-८-३६ (६४३०७)
तासां तु तेन शब्देन समीपे क्षत्रियर्षभाः ।
सम्भ्रान्ताः समनह्यन्त किमेतदिति चाब्रुवन् ॥ १०-८-३७ (६४३०८)
स्त्रियस्तु राजन्वित्रस्ता भारद्वाजं निरीक्ष्य ताः ।
अब्रुन्दीनकण्ठेन क्षिप्रमाद्रवतेति वै ॥ १०-८-३८ (६४३०९)
राक्षसो वा मनुष्यो वा नैनं जानीम कोन्वयम् ।
हत्वा पाञ्चालराजानं रथमारुह्य तिष्ठति ॥ १०-८-३९ (६४३१०)
ततस्ते योधमुख्यास्तं सहसा पर्यवारयन् ।
स तानापततः सर्वान्रुद्रास्त्रेण व्यपोथयत् ॥ १०-८-४० (६४३११)
धृष्टद्युम्नं च हत्वा स तांश्चैवास्य पदानुगान् ।
अपश्यच्छयने सुप्तमुत्तमौजसमन्तिके ॥ १०-८-४१ (६४३१२)
तमप्याक्रम्य पादेन कण्ठे चोरसि तेजसा ।
तथैव मारयामास विनर्दन्तमरिन्दमम् ॥ १०-८-४२ (६४३१३)
युधामन्युश्च विक्रान्तो मत्वा तं राक्षसं स्म सः ।
गदामुद्यम्य वेगेन हृदि द्रौणिमताडयत् ॥ १०-८-४३ (६४३१४)
ग्गदाप्रहाराभिहतो नाचलद्द्रौणिराहवे'।
तमभिद्रुत्य वेगेन क्षितौ चैनमपातयत् ॥ १०-८-४४ (६४३१५)
विस्फुरन्तं च पशुवत्तथैवैनममारयत् ।
तथा स वीरो हत्वा तं ततोऽन्यान्समुपाद्रवत् ॥ १०-८-४५ (६४३१६)
संसुप्तानेव राजेन्द्र तत्र तत्र महारथान् ।
पाञ्चालवीरानाक्रम्य क्रुद्धो न्यहनदन्तिके ।
स्फुरतो वेपमानांश्च शमितेव पशून्मखे ॥ १०-८-४६ (६४३१७)
ततो निस्त्रिंशमादाय जघानान्यान्पृथक्पृथक् ।
भागशो विचरन्मार्गानसियुद्धविशारदः ॥ १०-८-४७ (६४३१८)
तथैव गुल्मे सम्प्रेक्ष्य शयानान्मध्यगौल्मिकान् ।
श्रान्तान्व्यस्तायुधान्सर्वानसिनैव व्यपोथयत् ॥ १०-८-४८ (६४३१९)
योधानश्वान्द्विपांश्चैव प्राच्छिनत्स वरासिना ।
रुधिरोक्षितसर्वाङ्गः कालसृष्ट इवान्तकः ॥ १०-८-४९ (६४३२०)
विस्फुरद्भिश्च तैर्द्रौणिर्निस्त्रिंशस्योद्यमेन च ।
अवक्षेपेण चैवासेस्त्रिधा रक्तोक्षितोऽभवत् ॥ १०-८-५० (६४३२१)

तस्य लोहितरक्तस्य दीप्तखड्गस्य युध्यतः ।
अमानुष इवाकारो बभौ परमभीषणः ॥ १०-८-५१ (६४३२२)
ये त्वजाग्रन्त कौरव्य तेऽपि शब्देन मोहिताः ।
वीक्षमाणास्तु ते तत्र द्रौणिं दृष्ट्वा प्रविव्यथुः ॥ १०-८-५२ (६४३२३)
तद्रूपं तस्य ते दृष्ट्वा क्षत्रियाः शत्रुकर्शनम् ।
राक्षसं मन्यमानास्तं नयनानि न्यमीलयन् ॥ १०-८-५३ (६४३२४)
स घोररूपो व्यचरत्कालवच्छिबिरे तदा ।
अपश्यद्द्रौपदीपुत्रानवशिष्टांश्च सोमकान् ॥ १०-८-५४ (६४३२५)
तेन शब्देन वित्रस्ता धनुर्हस्ता महारथाः ।
धृष्टद्युम्नं हतं श्रुत्वा द्रौपदेया विशाम्पते ।
अवाकिरञ्शरव्रातैर्भारद्वाजमभीतवत् ॥ १०-८-५५ (६४३२६)
ततस्तेन निनादेन सम्प्रबुद्धाः प्रभद्रकाः ।
शिलीमुखैः शिखण्डी च द्रोणपुत्रं समार्दयन् ॥ १०-८-५६ (६४३२७)
भारद्वाजः स तान्दृष्ट्वा शरवर्षाणि वर्षतः ।
ननाद बलवन्नादं जिघांसुस्तान्महारथान् ॥ १०-८-५७ (६४३२८)
ततः परमसङ्क्रुद्धः पितुर्वधमनुस्मरन् ।
अवरुह्य रथोपस्थात्त्वरमाणोऽभिदुद्रुवे ॥ १०-८-५८ (६४३२९)
सहस्रचन्द्रविमलं गृहीत्वा चर्म संयुगे ।
खड्गं च विमलं दिव्यं जातरूपपरिष्कृतम् ।
द्रौपदेयानभिद्रुत्य खड्गेन व्यधमद्बली ॥ १०-८-५९ (६४३३०)
ततः स नरशार्दूलः प्रतिविन्ध्यं महाहवे ।
कुक्षिदेशेऽवधीद्राजन्स हतो न्यपतद्भुवि ॥ १०-८-६० (६४३३१)
प्रासेन विद्ध्वा द्रौणिं तु सुतसोमः प्रतापवान् ।
पुनश्चासिं समुद्यम्य द्रोणपुत्रमुपाद्रवत् ॥ १०-८-६१ (६४३३२)
सुतसोमस्य सासिं तं बाहुं छित्त्वा नरर्षभ ।
पुनरप्याहनत्पार्श्वे स भिन्नहृदयोऽपतत् ॥ १०-८-६२ (६४३३३)
नाकुलिस्तु शतानीको रथचक्रेण वीर्यवान् ।
दोर्भ्यामुत्क्षिप्य वेगेन वक्षस्येनमताडयत् ॥ १०-८-६३ (६४३३४)
अताडयच्छतानीकं मुक्तचक्रं द्विजस्तु सः ।
स विह्वलो ययौ भूमिं ततोऽस्यापाहरच्छिरः ॥ १०-८-६४ (६४३३५)
श्रुतकर्मा तु परिघं घोरं गृह्य दुरासदम् ।
अताडयत्समुद्यम्य वेगेन द्रौणिमुत्स्मयन् ॥ १०-८-६५ (६४३३६)
स तु तं श्रुतकर्माणमास्ये जघ्ने वरासिना ।
स हतो न्यपतद्भूमौ विमूर्धा विकृताननः ॥ १०-८-६६ (६४३३७)
तेन शब्देन वीरस्तु श्रुतकीर्तिरबुध्यत ।
अश्वत्थामानमासाद्य शरवर्षैरवाकिरत् ॥ १०-८-६७ (६४३३८)

ग्शरैराच्छादितस्तेन द्रोणपुत्रो महारथः ।
अदृश्यत महाराज श्वाविच्छललतो यथा ॥' १०-८-६८ (६४३३९)
तस्यापि शरवर्षाणि चर्मणा प्रतिवार्य सः ।
सकुण्डलं शिरः कायाद्भ्राजमानमपाहरत् ॥ १०-८-६९ (६४३४०)
ततो भीष्मनिहन्तारं सह सर्वैः प्रभद्रकैः ।
आहनत्सर्वतो वीरं नानाप्रहरणैर्बलात् ॥ १०-८-७० (६४३४१)
शिलीमुखेन चाप्येनं भ्रुवोर्मध्ये समार्पयत् ॥ १०-८-७१ (६४३४२)
स तु क्रोधसमाविष्टो द्रोणपुत्रो महाबलः ।
शिखण्डिनं समासाद्य द्विधा चिच्छेद सोसिना ॥ १०-८-७२ (६४३४३)
शिखण्डिनं ततो हत्वा क्रोधाविष्टः परन्तपः ।
प्रभद्रकगणान्सर्वानभिदुद्राव वेगवान् ॥ १०-८-७३ (६४३४४)
यच्च शिष्टं विराटस्य बलं तु भृशमाद्रवत् ।
द्रुपदस्य च पुत्राणां पौत्राणां सुहृदामपि ।
चकार कदनं घोरं दृष्ट्वा तत्र महाबलः ॥ १०-८-७४ (६४३४५)
अन्यानन्यांश्च पुरुषानभिसृत्याभिसृत्य च ।
न्यकृन्तदसिना द्रौणिरसिमार्गविशारदः ॥ १०-८-७५ (६४३४६)
कालीं रक्तास्यनयनां रक्तमाल्यानुलेपनाम् ।
रक्ताम्बरधरां घोरां पाशहस्तां कुटुम्बिनीम् ॥ १०-८-७६ (६४३४७)
ददृशुः कालरात्रिं ते स्मयमानामिव स्थिताम् ।
नराश्वकुञ्जरान्पाशैर्बद्ध्वा घोरैः प्रतस्थुषीम् ॥ १०-८-७७ (६४३४८)
वहन्तीं विविधान्प्रेतान्पाशबद्धान्विमूर्धजान् ।
तथैव च सदा राजन्न्यस्तशस्त्रान्महारथान् ॥ १०-८-७८ (६४३४९)
स्वप्ने सुप्तान्नयन्तीं तां रात्रिष्वन्यासु मारिष ।
ददृशुर्योधमुख्यास्ते घ्नन्तं द्रौणिं च नित्यदा ॥ १०-८-७९ (६४३५०)
यतः प्रभृति सङ्ग्रामः कुरुपाण्डवसेनयोः ।
ततः प्रभृति तां कन्यामपश्यन्द्रौणिमेव च ॥ १०-८-८० (६४३५१)
तांस्तु दैवहतान्पूर्वं पश्चाद्द्रौणिर्व्यपातयत् ।
त्रासयन्सर्वभूतानि विनदन्भैरवान्रवान् ॥ १०-८-८१ (६४३५२)
तदनुस्मृत्य ते वीरा दर्शनं पूर्वकालिकम् ।
इदं तदित्यमन्यन्त दैवेनोपनिपीडिताः ॥ १०-८-८२ (६४३५३)
ततस्तेन निनादेन प्रत्यबुध्यन्त धन्विनः ।
शिबिरे पाण्डवेयानां शतशोऽथ सहस्रशः ॥ १०-८-८३ (६४३५४)
सोऽच्छिनत्कस्यचित्पदौ जघनं चैव कस्यचित् ।
कांश्चिद्बिभेदपार्श्वेषु कालसृष्ट इवान्तकः ॥ १०-८-८४ (६४३५५)
अत्युग्रप्रतिपिष्टैश्च नदद्भिश्च भृशोत्कटैः ।
गजाश्वमथितैश्चान्यैर्मही कीर्णाऽभवत्प्रभो ॥ १०-८-८५ (६४३५६)

क्रोशतां किमिदं कोऽयं कः शब्दः किन्नु किं कृतम् ।
पाञ्चालानां तथा द्रौणिरन्तकः समपद्यत ॥ १०-८-८६ (६४३५७)
अपेतशस्त्रसन्नाहान्सन्नद्धान्पाण्डुसृञ्जयान् ।
प्राहिणोन्मृत्युलोकाय द्रौणिः प्रहरतां वरः ॥ १०-८-८७ (६४३५८)
ततस्तच्छस्त्रवित्रस्ता भयादभ्यपतन्नराः ।
निद्रान्धा नष्टसंज्ञाश्च तत्रतत्र निपेतिरे ॥ १०-८-८८ (६४३५९)
ऊरुस्तम्भगृहीताश्च कश्मलाभिहतौजसः ।
विनदन्तो भृशं त्रस्ता निरैक्षन्त परस्परम् ॥ १०-८-८९ (६४३६०)
ततो रथं पुनर्द्रौणिरास्थितो भीमदर्शनः ।
धनुष्पाणिः शरैरन्यान्प्रैषयद्वै यमक्षयम् ॥ १०-८-९० (६४३६१)
पुनरुत्पततश्चापि दूरादपि नरोत्तमान् ।
शूरान्सम्पततश्चान्यान्कालरात्र्यै न्यवेदयत् ॥ १०-८-९१ (६४३६२)
तथैव स्यन्दनाग्रेण प्रमथन्स व्यरोचत ।
शरवर्षैश्च विविधैरवर्षच्छात्रवांस्ततः ॥ १०-८-९२ (६४३६३)
पुनश्च सुविचित्रेण शतचन्द्रेण चर्मणा ।
तेन चाकाशवर्णेन तथाचरत सोऽसिना ॥ १०-८-९३ (६४३६४)
तथा स शिबिरं तेषां द्रौणिराहवदुर्मदः ।
व्यक्षोभयत राजेन्द्र महाह्रदमिव द्विपः ॥ १०-८-९४ (६४३६५)
उत्पेतुस्तेन शब्देन योधा राजन्विचेतसः ।
निद्रार्ताश्च भयार्ताश्च व्यधावन्त ततस्ततः ॥ १०-८-९५ (६४३६६)
विस्वरं चुक्रुशुश्चान्ये बह्वबद्धं तथाऽवदन् ।
न च स्म प्रत्यपद्यन्त शस्त्राणि वसनानि च ॥ १०-८-९६ (६४३६७)
विमुक्तकेशाश्चाप्यन्ये नाभ्यजानन्परस्परम् ।
उत्पतन्तोऽपतञ्श्रान्ताः केचित्तत्राभ्रमंस्तदा ।
पुरीषमसृजन्केचित्केचिन्मूत्रं प्रसुस्रुवुः ॥ १०-८-९७ (६४३६८)
बन्धनानि च राजेन्द्र सञ्छिद्य तुरगा द्विपाः ।
समं पर्यपतंश्चान्ये कुर्वन्तो महदाकुलम् ॥ १०-८-९८ (६४३६९)
तत्र केचिन्नरा भीता व्यलीयन्त महीतले ।
तथैव तान्निपतितानपिंषन्गजवाजिनः ॥ १०-८-९९ (६४३७०)
तस्मिंस्तथा वर्तमाने रक्षांसि पुरुषर्षभ ।
हृष्टानि व्यनदन्नुच्चैर्मुदा युक्तानि सत्तम ॥ १०-८-१०० (६४३७१)
स शब्दः प्रेरितो राजन्भूतसङ्घैर्मुदा युतैः ।
अपूरयद्दिशः सर्वा दिवं चातिमहान्स्वनः ॥ १०-८-१०१ (६४३७२)
तेषामार्तरवं श्रुत्वा वित्रस्ता गजवाजिनः ।
मुक्ताः पर्यपतन्राजन्मृद्नन्तः शिबिरे जनम् ॥ १०-८-१०२ (६४३७३)
तैस्तत्र परिधावद्भिश्चरणोदीरितं रजः ।

अकरोच्छिबिरे तेषां रजन्यां द्विगुणं तमः ॥ १०-८-१०३ (६४३७४)
तस्मिंस्तमसि सञ्जाते प्रमूढाः सर्वतो जनाः ।
नाजानन्पितरः पुत्रान्भ्रातॄन्भ्रातर एव च ॥ १०-८-१०४ (६४३७५)
गजो राजानतिक्रम्य निर्मनुष्या हया हयान् ।
अताडयंस्तथाऽभञ्जंस्तथाऽमृद्नंश्च भारत ॥ १०-८-१०५ (६४३७६)
ते भग्नाः प्रपतन्ति स्म मृद्नन्तश्च परस्परम् ।
न्यपातयंस्तथा चान्यान्पातयित्वा तदाऽपिषन् ॥ १०-८-१०६ (६४३७७)
विचेतसः सनिद्राश्च तमसा चावृता नराः ।
जघ्नुः स्वानेव तत्राथ कालेनैव प्रचोदिताः ॥ १०-८-१०७ (६४३७८)
त्यक्त्वाद्वाराणि च द्वास्थास्तथागुल्मानिगौल्मिकाः ।
प्राद्रवन्त यथाशक्ति कांदिशीका विचेतसः ॥ १०-८-१०८ (६४३७९)
विप्रनष्टाश्च तेऽन्योन्यं नाजानन्तस्तथा विभो ।
क्रोशन्तस्तात पुत्रेति दैवोपहतचेतसः ॥ १०-८-१०९ (६४३८०)
पलायतां दिशस्तेषां स्वानप्युत्सृज्य बान्धवान् ।
गोत्रनामभिरन्योन्यमाक्रन्दन्त ततो जनाः ॥ १०-८-११० (६४३८१)
हाहाकारं च कुर्वाणाः पृथिव्यां शेरते परे ।
तान्बुद्ध्वा रणमध्येऽसौ द्रोणपुत्रो व्यपोथयत् ॥ १०-८-१११ (६४३८२)
तत्रापरे वध्यमाना मुहुर्मुहुरचेतसः ।
शिबिरान्निष्पतन्ति स्म क्षत्रिया भयपीडिताः ॥ १०-८-११२ (६४३८३)
तांस्तु निष्पतितांस्त्रस्ताञ्शिबिराज्जीवितैषिणः ।
कृतवर्मा कृपश्चैव द्वारदेशे निजघ्नतुः ॥ १०-८-११३ (६४३८४)
विसस्तयन्त्रकवचान्मुक्तकेशान्कृताञ्जलीन् ।
वेपमानान्क्षितौ भीतान्नैव कांश्चिदमुच्यताम् ॥ १०-८-११४ (६४३८५)
नामुच्यत तयोः कश्चिन्निष्क्रान्तः शिबिराद्बहिः ॥
कृपश्चैव महाराज हार्दिक्यश्चैव दुर्मतिः। १०-८-११५ (६४३८६)
भूयश्चैव चिकीर्षन्तौ द्रौणपुत्रस्य तौ प्रियम् ।
त्रिषु देशेषु ददतुः शिबिरस्य हुताशनम् ॥ १०-८-११६ (६४३८७)
ततः प्रकाशे शिबिरे खड्गेन पितृनन्दनः ।
अश्वत्थामा महाराज व्यचरत्कृतहस्तवत् ॥ १०-८-११७ (६४३८८)
कांश्चिदापततो वीरानपरांश्चैव धावतः ।
व्ययोजयत खड्गेन प्राणैर्द्विजवरोत्तमः ॥ १०-८-११८ (६४३८९)
कांश्चिद्योधान्स खड्गेन मध्ये सञ्छिद्य वीर्यवान् ।
अशातयद्द्रोणपुत्रः संरब्धस्तिलकाण्डवत् ॥ १०-८-११९ (६४३९०)
निनदद्भिर्भृशायस्तैर्नराश्वद्विरदोत्तमैः ।
पतितैरभवत्कीर्णा मेदिनी भरतर्षभ ॥ १०-८-१२० (६४३९१)
मानुषाणां सहस्रेषु हतेषु पतितेषु च ।

उदतिष्ठन्कबन्धानि बहून्युत्थाय चापतन् ॥१०-८-१२१ (६४३९२)
सायुधान्साङ्गदान्बाहून्विचकर्त शिरांसि च ।
हस्तिहस्तोपमानूरून्हस्तान्पादांश्च भारत ॥१०-८-१२२ (६४३९३)
पृष्ठच्छिन्नान्पार्श्वच्छिन्नाञ्शिरश्छिन्नांस्तथापरान् ।
स महात्माकरोद्द्रौणिः कांश्चिच्चापि पराङ्मुखान् ॥१०-८-१२३ (६४३९४)
मध्यदेशे नरानन्यांश्चिच्छेदान्यांश्च कर्णतः ।
अंसदेशे निहत्यान्यान्काये प्रावेशयच्छिरः ॥१०-८-१२४ (६४३९५)
एवं हि बहुभिः शस्त्रैर्घ्नतोऽपि बलवत्तरान् ।
तमसा रजनी घोरा बभौ दारुणदर्शना ॥१०-८-१२५ (६४३९६)
किञ्चित्प्राणैश्च पुरुषैर्हतैश्चान्यैः सहस्रशः ।
बहुना च गजाश्वेन भूतभूर्भीमदर्शना ॥१०-८-१२६ (६४३९७)
यक्षरक्षःसमाकीर्णे रथाश्वद्विपदारुणे ।
क्रुद्धेन द्रोणपुत्रेण सञ्छिन्नाः प्रापतन्भुवि ।
भ्रातॄनन्ये पितॄनन्ये पुत्रानन्ये विचुक्रुशुः ॥ १०-८-१२७ (६४३९८)
केचिदूचुर्न तत्क्रुद्धैर्धार्तराष्ट्रैः कृतं रणे ।
यत्कृतं नः प्रसुप्तानां रक्षोभिः क्रूरकर्मभिः ।
असान्निध्याद्धि पार्थानामिदं वः कदनं कृतम् ॥ १०-८-१२८ (६४३९९)
न चासुरैर्न गन्धर्वैर्न यक्षैर्न च राक्षसैः ।
शक्यो विजेतुं कौन्तेयो नेता यस्य जनार्दनः ।
ब्रह्मण्यः सत्यवाग्दान्तः सर्वभूतानुकम्पकः ॥ १०-८-१२९ (६४४००)
न च सुप्तं प्रमत्तं वा न्यस्तशस्त्रं कृताञ्जलिम् ।
धावन्तं मुक्तकेशं वा हन्ति पार्थो धनञ्जयः ॥१०-८-१३० (६४४०१)
तदिदं नः कृतं घोरं रक्षोभिः क्रूरकर्मभिः ।
इति लालप्यमानाः स्म शेरते बहवो जनाः ॥१०-८-१३१ (६४४०२)
स्तनतां च मनुष्याणामपरेषां च कूजताम् ।
ततो मुहूर्तात्प्राशाम्यत्स शब्दस्तुमुलो महान् ॥१०-८-१३२ (६४४०३)
शोणितव्यतिषिक्तायां वसुधायां च भूमिप ।
तद्रजस्तुमुलं घोरं क्षणेनान्तरधीयत ॥१०-८-१३३ (६४४०४)
स चेष्टमानानुद्विग्नान्निरुत्साहान्सहस्रशः ।
न्यपातयन्नरान्क्रुद्धः पशून्पशुपतिर्यथा ॥१०-८-१३४ (६४४०५)
अन्योन्यं सम्परिष्वज्य शयानाञ्जीवतोऽपरान् ।
संलीनान्युध्यमानांश्च सर्वान्द्रौणिरपोथयत् ॥१०-८-१३५ (६४४०६)
दह्यमाना हुताशेन वध्यमानाश्च तेन ते ।
परस्परं तदा योधाननयद्यमसादनम् ॥१०-८-१३६ (६४४०७)
तस्या रजन्यास्त्वर्धेन पाण्डवानां महद्बलम् ।
गमयामास राजेन्द्र द्रौणिर्यमनिवेशनम् ॥१०-८-१३७ (६४४०८)

निशाचराणां सत्वानां रात्रिः सा हर्षवर्धिनी ।
आसीन्नरगजाश्वानां रौद्री क्षयकरी भृशम् ॥ १०-८-१३८ (६४४०९)
तत्रादृश्यन्त रक्षांसि पिशाचाश्च पृथग्विधाः ।
खादन्तो नरमांसानि पिबन्तः शोणितानि च ॥ १०-८-१३९ (६४४१०)
करालाः पिङ्गला रौद्राः शैलदन्ता रजस्वलाः ।
जटिला भीमवक्त्राश्च पञ्चपादा महोदराः ॥ १०-८-१४० (६४४११)
पञ्चादङ्गुलयो रूक्षा विरूपा भैरवस्वनाः ।
गजाननाश्च ह्रस्वाश्च नीलवर्णा बिभीषणाः ॥ १०-८-१४१ (६४४१२)
सपुत्रदाराः सुक्रूराः सुदुर्दर्शाः सुनिर्घृणाः ।
विविधानि च रूपाणि तत्रादृश्यन्त रक्षसाम् ॥ १०-८-१४२ (६४४१३)
पीत्वा च शोणितं हृष्टाः प्रानृत्यन्गणशोऽपरे ।
इदं परमिदं मेध्यमिदं स्वाद्विति चाब्रुवन् ॥ १०-८-१४३ (६४४१४)
मेदोमज्जास्थिरक्तानां मांसानां च भृशाशिताः ।
परे मांसानि खादन्तः क्रव्यादा मांसजीविनः ॥ १०-८-१४४ (६४४१५)
वसाश्चैवापरे पीत्वा पर्यधावन्विकुक्षिकाः ।
नानावक्त्रास्तथा रौद्राः क्रव्यादाः पिशिताशनाः ॥ १०-८-१४५ (६४४१६)
अयुतानि च तत्रासन्प्रयुतान्यर्बुदानि च ।
रक्षसां घोररूपाणां महतां क्रुरकर्मणाम् ॥ १०-८-१४६ (६४४१७)
मुदितानां वितृप्तानां तस्मिन्महति वैशसे ।
समेतानि बहून्यासन्भूतानि च जनाधिप। १०-८-१४७ (६४४१८)
एवंविधा हि सा रात्रिः सोमकानां जनक्षये ।
प्रसुप्तानां प्रमत्तानामासीत्सुभृशदारुणा ॥ १०-८-१४८ (६४४१९)
असंशयं हि कालस्य पर्यायो दुरतिक्रमः ।
तादृशा निहता यत्र कृत्वाऽस्माकं जनक्षयम् ॥ १०-८-१४९ (६४४२०)
धृतराष्ट्र उवाच। १०-८-१५०क्ष् (५२७७)
प्रागेव सुमहत्कर्म द्रौणिरेतन्महारथः ।
नाकरोदीदृशं कस्मान्मत्पुत्रविजये धृतः ॥ १०-८-१५० (६४४२१)
अथ कस्माद्धते क्षत्रे कर्मेदं कृतवानसौ ।
द्रोणपुत्रो महात्मा स तन्मे शंसितुमर्हसि ॥ १०-८-१५१ (६४४२२)
सञ्जय उवाच। १०-८-१५२क्ष् (५२७८)
तेषां नूनं भयान्नासौ कृतवान्कुरुनन्दन ।
असान्निध्याद्धि पार्थानां केशवस्य च धीमतः ।
सात्यकेश्चापि कर्मेदं द्रोमपुत्रेण साधितम् ॥ १०-८-१५२ (६४४२३)
को हि तेषां समक्षं तान्हन्यादपि मरुत्पतिः ।
एतदीदृशकं वृत्तं राजन्सुप्तजने विभो ॥ १०-८-१५३ (६४४२४)
ततो जनक्षयं कृत्वा पाण्डवानां महात्ययम् ।

प्रत्यूषकाले शिबिरात्प्रतिगन्तुमियेष सः ॥ १०-८-१५४ (६४४२५)
नृशोणितावसिक्तस्य द्रौणेरासीदसित्सरुः ।
पाणिना सह संश्लिष्ट एकीभूत इव प्रभो ॥ १०-८-१५५ (६४४२६)
स निःशेषानरीन्कृत्वा विरराम निशाक्षये ।
युगान्ते सर्वभूतानि भस्म कृत्वेव पावकः ॥ १०-८-१५६ (६४४२७)
यथाप्रतिज्ञं तत्कर्म कृत्वा द्रौणायनिः प्रभो ।
दुर्गमां पदवीं गच्छन्पितुरासीद्गतज्वरः ॥ १०-८-१५७ (६४४२८)
यथैव संसुप्तजने शिबिरे प्राविशन्निशि ।
तथैव हत्वा निःशब्दो निश्चक्राम नरर्षभः ॥ १०-८-१५८ (६४४२९)
निष्क्रम्य शिबिरात्तस्मात्ताभ्यां सङ्गम्य वीर्यवान् ।
आचख्यौ कर्म तत्सर्वं हृष्टः संहर्षयन्विभो ॥ १०-८-१५९ (६४४३०)
तावथाचख्यतुस्तस्मै प्रियं प्रियकरौ तदा ।
पाञ्चालान्सृञ्जयांश्चैव विनिकृत्तान्सहस्रशः ॥ १०-८-१६० (६४४३१)
प्रीत्या चोच्चैरुदक्रोशंस्तथैवास्फोटयंस्तलान् ।
दिष्ट्यादिष्ट्येति चान्योन्यं समेत्योचुर्महारथाः ॥ १०-८-१६१ (६४४३२)
पर्यष्वजत्ततो द्रौणिस्ताभ्यां सम्प्रतिनन्दितः ।
इदं हर्षात्तु सुमहदाददे वाक्यमुत्तमम् ॥ १०-८-१६२ (६४४३३)
पाञ्चाला निहताः सर्वे द्रौपदेयाश्च सर्वशः ।
सोमका मत्स्यशेषाश्च सर्वे विनिहता मया ॥ १०-८-१६३ (६४४३४)
इदानीं कृतकृत्याः स्म याम तत्रैव मा चिरम् ।
यदि जीवति नो राजा तस्मै शंसामहे प्रियम् ॥ ॥ १०-८-१६४ (६४४३५)

इति श्रीमन्महाभारते सौप्तिकपर्वणि अष्टमोऽध्यायः ॥ ८ ॥

Mahabharata - Sauptika Parva - Chapter Footnotes

१०-८-७ पाञ्चालैः पूर्वं निहतौ सन्तौ स्वपतां कच्चित् कोपात्
स्वपतां पाञ्चालानां कर्म वधाख्यं ताभ्यां कच्चित्कृतमिति
सम्बन्धः ॥
१०-८-८ शिबिरद्वार्यतिष्ठतामिति झ पाठः ॥
१०-८-११ वां युवां प्राप्येति शेषः ॥
१०-८-१३ उद्देशज्ञः धृष्टद्युम्नस्थलज्ञः ॥
१०-८-३० पादाष्ठीलैरिति झ पाठः । तत्र पादाष्ठीलैः
पादग्रन्थिभिः। पार्ष्णिघातैरित्यर्थः ॥
१०-८-५० तैश्छिन्नगात्रैर्विस्फुरद्भिस्तेषां शरीरादुच्चलद्भी
रक्तबिन्दुभिरित्यर्थः ॥
१०-८-८७ पाण्डुसृञ्जयान् पाण्डवसम्बन्धिनः सृञ्जयान्

। पाण्डोर्गोत्रापत्यानि सृञ्जयाश्च तान्वा ॥
१०-८-१०५ अभञ्जन् गात्राण्यनमयन् । अमृद्नन् परस्परं मर्दितवन्तः ॥
१०-८-१०६ अपिषन् अपिंषन् ॥
१०-८-१४४ भृशाशिताः भृशं संन्तर्पिताः ॥
१०-८-१४५ विकुक्षिकाः विपुलकुक्षयः ॥
१०-८-८ अष्टमोऽध्यायः ॥

सौप्तिकपर्व - अध्याय ००९
॥ श्रीः ॥
१०.९. अध्यायः ९

Mahabharata - Sauptika Parva - Chapter Topics
द्रौणिकृपकृतवर्मभिर्दुर्योधनमेत्य शोचनम् ॥ १ ॥
दुर्योधनम्प्रति द्रौणिना सुप्तजवधकथनम् ॥ २ ॥
दुर्योधनेन प्राणत्यागः ॥ ३ ॥
द्रौण्यादीनां नगरगमनम् ॥ ४ ॥
सञ्जयस्य व्यासानुग्रहप्राप्तदिव्यज्ञाननाशः ॥ ५ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-९-० (६४४३६)
सञ्जय उवाच। १०-९-०क्ष् (५२७९)
ते हत्वा सर्वपाञ्चालान्द्रौपदेयांश्च सर्वशः ।
आगच्छन्सहितास्तत्र यत्र दुर्योधनो हतः ॥ १०-९-१ (६४४३७)
गत्वा चैनमपश्यन्त किञ्चित्प्राणं जनाधिपम् ।
ततो रथेभ्यः प्रस्कन्द्य परिवव्रुस्तवात्मजम् ॥ १०-९-२ (६४४३८)
तं भग्नसक्थं राजेन्द्र कृच्छ्रप्राणमचेतसम् ।
वमन्तं रुधिरं वक्त्रादपश्यन्वसुधातले ॥ १०-९-३ (६४४३९)
वृतं समन्ताद्बहुभिः श्वापदैर्घोरदर्शनैः ।
सालावृकगणैश्चैव भक्षयिष्यद्भिरन्तिकात् ॥ १०-९-४ (६४४४०)
निरायन्तं कृच्छ्रात्तांश्वापदांश्च चिखादिषून् ।
विवेष्टमानमुरुभ्यां सुभृशं गाढवेदनम् ॥ १०-९-५ (६४४४१)
तं शयानं तथा दृष्ट्वा भूमौ सुरुधिरोक्षितम् ।
हतशिष्टास्त्रयो वीराः शोकार्ताः पर्यदेवयन् ।
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ॥ १०-९-६ (६४४४२)
तैस्त्रिभिः शोणितादिग्धैर्निः श्वसद्भिर्महारथैः ।

शुशुभे स वृतो राजा वेदी त्रिभिरिवाग्निभिः ॥ १०-९-७ (६४४४३)
ते तं शयानं सम्प्रेक्ष्य राजानमतथोचितम् ।
अविषह्येन दुःखेन ततस्ते रुरुदुस्त्रयः ॥ १०-९-८ (६४४४४)
ततस्तु रुधिरं हस्तैर्मुखान्निर्मृज्य तस्य हि ।
रणे राज्ञः शयानस्य कृपः सम्पर्यदेवयत् ॥ १०-९-९ (६४४४५)
कृप उवाच। १०-९-१०क्ष् (५२८०)
न दैवस्यातिभारोऽस्ति यदयं रुधिरोक्षितः ।
एकादशचमूभर्ता शेते दुर्योधनो हतः ॥ १०-९-१० (६४४४६)
पश्य चामीकराभस्य चामीकरविभूषिताम् ।
गदां गदाप्रियस्येमां समीपे पतितां भुवि ॥ १०-९-११ (६४४४७)
इयमेनं गदा शूरं न जहाति रणेरणे ।
स्वर्गायापि व्रजन्तं हि न जहाति यशस्विनम् ॥ १०-९-१२ (६४४४८)
पश्येमां सह वीरेण जाम्बूनदविभूषिताम् ।
शयानां शयने हर्म्ये भार्यां प्रीतिमतीमिव ॥ १०-९-१३ (६४४४९)
योऽयं मूर्धाभिषिक्तानामग्रे याति परन्तपः ।
स हतो ग्रसते पांसून्पश्य कालसय पर्ययम् ॥ १०-९-१४ (६४४५०)
येनाजौ निहता भूमौ शेरते क्षत्रियर्षभाः ।
स भूमौ निहतः शेते कुरुराजः परैरयम् ॥ १०-९-१५ (६४४५१)
भयान्नमन्ति राजानो यस्य स्म शतसङ्घशः ।
स वीरशयने शेते क्रव्याद्भिः परिवारितः ॥ १०-९-१६ (६४४५२)
यमुपासन्नृपाः पूर्वमर्थहेतोर्महीपतिम् ।
उपात्पते च तं ह्यद्य क्रव्यादा मांसगृद्धिनः ॥ १०-९-१७ (६४४५३)
सञ्जय उवाच। १०-९-१८क्ष् (५२८१)
तं शयानं कुरुश्रेष्ठं ततो भरतसत्तमम् ।
अश्वत्थामा समालिङ्ग्य करुणं पर्यदेवयत् ॥ १०-९-१८ (६४४५४)
आहुस्त्वां राजशार्दूल मुख्यं सर्वधनुष्मताम् ।
धनाध्यक्षोपमं युद्धे शिष्यं सङ्कर्षणस्य च ॥ १०-९-१९ (६४४५५)
कथं विवरमद्राक्षीद्भीमसेनस्तवानघ ।
बलिनं कृतिनो नित्यं सूदः पापात्मवान्नृप ॥ १०-९-२० (६४४५६)
कालो नूनं महाराज लोकेऽस्मिन्बलवत्तरः ।
पश्यामो निहतं त्वां च भीमसेनेन संयुगे ॥ १०-९-२१ (६४४५७)
कथं त्वां सर्वधर्मज्ञं क्षुद्रः पापो वृकोदरः ।
निकृत्या हतवान्मन्दो नून कालो दुरत्ययः ॥ १०-९-२२ (६४४५८)
द्वन्द्वयुद्धे ह्यधर्मेण समाहूयौजसा मृधे ।
गदया भीमसेनेन निर्भग्ने सक्थिनी तव ॥ १०-९-२३ (६४४५९)
अधर्मेण हतस्याजौ मृद्यमानं पदा शिरः ।

य उपेक्षितवान्क्षुद्रं धिक्तमस्तु--युधिष्ठिरम् ॥ १०-९-२४ (६४४६०)
युद्धेष्वपवदिष्यन्ति योधा नूनं वृकोदरम् ।
यावत्स्थास्यन्ति भूतानि निकृत्या ह्यसि पातितः ॥ १०-९-२५ (६४४६१)
ननु रामोऽब्रवीद्राजंस्त्वां सदा यदुनन्दनः ।
दुर्योधनसमो नास्ति गदायामिति वीर्यवान् ॥ १०-९-२६ (६४४६२)
श्लाघते त्वां हि वार्ष्णेयो राजन्संसत्सु भारत ।
स शिष्यो मम कौरव्यो गदायुद्ध इति प्रभो ॥ १०-९-२७ (६४४६३)
यां गतिं क्षत्रियस्याहुः प्रशस्तां परमर्षयः ।
हतस्याभिमुखस्याजौ प्राप्तस्त्वमसि तां गतिम् ॥ १०-९-२८ (६४४६४)
दुर्योधन न शोचामि त्वामहं पुरुषर्षभ ।
हतपुत्रौ तु शोचामि गान्धारीं पिरं च ते ॥ १०-९-२९ (६४४६५)
द्वावनाथौ कृतौ वीर त्वया नाथेन वर्धितौ ।
भिक्षुकौ विचरिष्येते शोचन्तौ पृथिवीमिमाम् ॥ १०-९-३० (६४४६६)
घिगस्तु कृष्णं वार्ष्णेयमर्जुनं चापि दुर्मतिम् ।
धर्मज्ञमानिमौ यौ त्वां वध्यमानमुपेक्षताम् ॥ १०-९-३१ (६४४६७)
पाण्डवाश्चापि ते सर्वे किं वक्ष्यन्ति नराधिप ।
कथं दुर्योधनोऽस्माभिर्हत इत्यनपत्रपाः ॥ १०-९-३२ (६४४६८)
धन्यस्त्वमसि गान्धारे यस्त्वमायोधने हतः ।
प्रयातोऽभिमुखः शत्रून्धर्मेण पुरुषर्षभ ॥ १०-९-३३ (६४४६९)
हतपुत्रा हि गान्धारी निहतज्ञातिबान्धवा ।
प्रज्ञाचक्षुश्च दुर्धर्षः कां दशां प्रतिपत्स्यते ॥ १०-९-३४ (६४४७०)
धिगस्तु कृतवर्माणं मां कृपं च महारथम् ।
ये वयं न गताः स्वर्गं त्वां पुरस्कृत्य पार्थिवम् ॥ १०-९-३५ (६४४७१)
दातारं सर्वकामानां रक्षितारं प्रजाहितम् ।
यद्वयं नानुगच्छाम त्वां धिगस्मान्नराधमान् ॥ १०-९-३६ (६४४७२)
कृपस्य तव वीर्येण मम चैव पितुश्च मे ।
सभृत्यानां नरव्याघ्र रत्नवन्ति गृहाणि च ॥ १०-९-३७ (६४४७३)
तव प्रसादादस्माभिः समित्रैः सह बान्धवैः ।
अवाप्ताः क्रतवो मुख्या बहवो भूरिदक्षिणाः ॥ १०-९-३८ (६४४७४)
कुतश्चापीदृशं पापाः प्रवर्तिष्यामहे वयम् ।
यादृशेन पुरस्कृत्य त्वं गतः सर्वपार्थिवान् ॥ १०-९-३९ (६४४७५)
वयमेव त्रयो राजन्गच्छन्तं परमां गतिम् ।
यद्वै त्वां नानुगच्छाभस्तेन तप्स्यामहे वयम्। १०-९-४० (६४४७६)
तत्स्वर्गहीना हीनार्थाः स्मरन्तः सुकृतस्य ते ।
किं नाम तद्भवेत्कर्म येन त्वां न व्रजाम वै ॥ १०-९-४१ (६४४७७)
दुःखं नून कुरुश्रेष्ठ चरिष्याम महीमिमाम् ।

हीनानां नस्त्वया राजन्कुतः शान्तिः कुतः सुखं ॥ १०-९-४२ (६४४७८)
गत्वैव तु महाराज समेत्य च महारथान् ।
यथाज्येष्ठं यथाश्रेष्ठं पूजयेर्वचनान्मम ॥ १०-९-४३ (६४४७९)
आचार्यं पूजयित्वा च केतुं सर्वधनुष्मताम् ।
हतं मयाऽद्य शंशेथा दृष्टद्युम्नं नराधिप ॥ १०-९-४४ (६४४८०)
परिष्वजेथा राजानं बाह्लिकं सुमहारथम् ।
सैन्धवं सोमदत्तं च भूरिश्रवसमेव च ॥ १०-९-४५ (६४४८१)
तथा पूर्वगतानन्यान्स्वर्गे पार्थिवसत्मान् ।
अस्मद्वाक्यात्परिष्वज्य सम्पृच्छेस्त्वमनामयम् ॥ १०-९-४६ (६४४८२)
सञ्जय उवाच। १०-९-४७क्ष् (५२८२)
इत्येवमुक्त्वा राजानं भग्नसक्थमचेतसम् ।
अश्वत्थामा लघुप्राणं पुनर्वचनमब्रवीत् ॥ १०-९-४७ (६४४८३)
दुर्योधन जीवसि चेद्वाक्यं श्रोत्रमुखं शृणु ।
सप् पाण्डवतः शिष्टा धार्तराष्ट्रास्त्रयो वयम् ॥ १०-९-४८ (६४४८४)
ते चैव भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः ।
अहं च कृतवर्मा च कृपः शारद्वतस्तथा ॥ १०-९-४९ (६४४८५)
द्रौपदेया हताः सर्वे धृष्टद्युम्नस्य चात्मजाः ।
पञ्चाला निहताः सर्वे मत्स्यशेषं च भारत ॥ १०-९-५० (६४४८६)
कृते प्रतिकृतं पश्य हतपुत्रा हि पाण्डवाः ।
सौप्तिके शिबिरं तेषां हतं सनरवाहनम् ॥ १०-९-५१ (६४४८७)
मया च पापकर्माऽसौ धृष्टद्युम्नो महीपते ।
प्रविश्य शिबिरं रात्रौ पशुमारेण मारितः ॥ १०-९-५२ (६४४८८)
दुर्योधनस्तु तां वाचं निशम्य मनसः प्रियाम् ।
प्रतिलभ्य पुनश्चेत इदं वचनमब्रवीत् ॥ १०-९-५३ (६४४८९)
न मेऽकरोत्तद्गाङ्गेयो न कर्णो न च ते पिता ।
यत्त्वया कृपभोजाभ्यां सहितेनाद्य मे कृतम् ॥ १०-९-५४ (६४४९०)
स च सेनापतिः क्षुद्रो हतः सार्धं शिखण्डिना ।
तेन मन्ये मघवता सममात्मानमद्य वै ॥ १०-९-५५ (६४४९१)
स्वस्ति प्राप्नुत भद्रं वः स्वर्गे नः सङ्गमः पुनः ।
इत्येवमुक्त्वा पुत्रस्ते कुरुराजो महामनाः ॥ १०-९-५६ (६४४९२)
प्राणानुपासृजद्वीरः सुहृदां दुःखमादधत् ।
अपाक्रामद्दिवं पुण्यां शरीरं क्षितिमाविशत् ॥ १०-९-५७ (६४४९३)
एवं ते निधनं यातः पुत्रो दुर्योधनो नृप ।
अग्रे यात्वा रणे शूरः पश्चाद्विनिहतः परैः ॥ १०-९-५८ (६४४९४)
तथैव ते परिष्वक्ताः परिष्वज्य च ते नृपम् ।
पुनः पुनः प्रेक्षमाणाः स्वकानारुरुहू रथान् ॥ १०-९-५९ (६४४९५)

इत्येवं द्रोणपुत्रस्य निशम्य करुणां गिरम् ।
प्रत्यूषकाले शोकार्ताः प्राद्रवन्नगरं प्रति ॥ १०-९-६० (६४४९६)
एवमेष क्षयो वृत्तः कुरुपाण्डवसेनयोः ।
घोरो विशसनो रौद्रो राजन्दुर्मन्त्रिते तव ॥ १०-९-६१ (६४४९७)
तव पुत्रे गते स्वर्गं शोकार्त्स्य ममानघ ।
ऋषिदत्तं प्रनष्टं तद्दिव्यदर्शित्वमद्य वै ॥ १०-९-६२ (६४४९८)
वैशम्पायन उवाच। १०-९-६३क्ष् (५२८३)
इति श्रुत्वा स नृपतिर्ज्ञातिपुत्रवधं तदा ।
निःश्वस्य दीर्घमुष्णं च ततश्चिन्तापरोऽभवत् ॥ ॥ १०-९-६३ (६४४९९)

इति श्रीमन्महाभारते सौप्तिकपर्वणि नवमोऽध्यायः ॥ ९ ॥
Mahabharata - Sauptika Parva - Chapter Footnotes

१०-९-१७ उपासत द्विजाः पूर्वमर्थहेतोर्यमीश्वरमिति झ पाठः ॥
१०-९-२३ धर्मयुद्धे ह्यधर्मेणेति झ पाठः ॥
१०-९-९ नवमोऽध्यायः ॥

सौप्तिकपर्व - अध्याय ०१०
॥ श्रीः ॥
१०.१०. अध्यायः १०

Mahabharata - Sauptika Parva - Chapter Topics
दैवादुर्वरितेन दृष्टद्युम्नसारथिना युधिष्ठिराय रात्रौ
वृत्तशिबिरवृत्तान्तविनेदनम् ॥ १ ॥
तच्छ्रवणेन द्रौपद्यानयनाय नकुलभादिश्य शिबिरभुवमुपागतवता
युधिष्ठिरेण गृतनिजजनावलोकनेन परिदेवनम् ॥ २ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-१०-० (६४५००)
वैशम्पायन उवाच। १०-१०-०क्ष् (५२८४)
तस्यां रात्र्यां व्यतीतायां धृष्टद्युम्नस्य सारथिः ।
गत्वा शशंस पाण्डुभ्यः सौप्तिके कदनं कृतम् ॥ १०-१०-१ (६४५०१)
सूत उवाच। १०-१०-२क्ष् (५२८५)
द्रौपदेया हता राजन्द्रुपदस्वात्मजैः सह ।
प्रमत्ता निशि विश्वस्ताः स्वपन्तः शिबिरे स्वके ॥ १०-१०-२ (६४५०२)

गौतमेन नृशंसेन भोजेन कृतवर्मणा ।
अश्वत्थाम्ना च पापेन हतं वः शिबिरं निशि ॥ १०-१०-३ (६४५०३)
एतैर्नरगजाश्वानां प्रासशक्तिपरश्वयैः ।
सहस्रामि विकृन्द्भिर्निः शेषं शिबिरं कृतम् ॥ १०-१०-४ (६४५०४)
ґxxxxxx विहगफलभारनतस्य ह।'
xxxxxxx महतो वनस्येव परश्वथैः ।
xxxxxxxx सुमहाञ्शब्दो बलस्य तव भारत ॥ १०-१०-५ (६४५०५)
महमेकोऽबशिष्टस्तु तस्मात्सैन्यामहीपते ।
मुक्तः कथञ्चिद्धर्मात्मन्व्यग्राच्च कृतवर्मणः ॥ १०-१०-६ (६४५०६)
तच्छ्रुत्वा वाक्यमशिवं कुन्तीपुत्रो युधिष्ठिरः ।
पपात मह्यां धर्मात्मा पुत्रशोकसमन्वितः ॥ १०-१०-७ (६४५०७)
पतन्तं तमतिक्रम्य परिजग्राह सात्यकिः ।
भीमसेनोऽर्जुनश्चैव माद्रीपुत्रौ च पाण्डवौ ॥ १०-१०-८ (६४५०८)
लब्धचेतास्तु कौन्तेयः शोकविह्वलया गिरा ।
जित्वा शत्रूञ्जितः पश्चात्पर्यदेवयदार्तवत् ॥ १०-१०-९ (६४५०९)
ґअगम्या गतिरर्थानां कर्मणामीश्वरस्य च'।
दुर्विदा गतिरर्थानामपि ये दिव्यचक्षुषः ।
जीयमाना जयन्त्यन्ये जयमाना वयं जिताः ॥ १०-१०-१० (६४५१०)
हत्वा भ्रातॄन्वयस्यांश्च पितॄन्पुत्रान्सुहृद्गणान् ।
बन्धूनमात्यान्पौत्रांश्च जित्वा सर्वाञ्जिता वयम् ॥ १०-१०-११ (६४५११)
अनर्थो ह्यर्थसङ्काशस्तथाऽनर्थोऽर्थदर्शनः ।
जयोऽयमजयाकारो जयस्तस्मात्पराजयः ॥ १०-१०-१२ (६४५१२)
यज्जित्वा तप्यते पश्चादापन्न इव दुर्मतिः ।
कथं मन्येत विजयं ततो जिततरः परैः ॥ १०-१०-१३ (६४५१३)
येषामर्थाय पापं स्याद्विजयस्य सुहृद्वधैः ।
निर्जितैरप्रमत्तैर्हि विजिता जितकाशिनः ॥ १०-१०-१४ (६४५१४)
कर्णिनालीकदंष्ट्रस्य स्वङ्गजिह्वस्य संयुगे ।
चापव्यात्तास्यरौद्रस्य ज्यातलस्वननादिनः ॥ १०-१०-१५ (६४५१५)
क्रुद्धस्य नरसिंहस्य सङ्ग्रामेष्वपलायिनः ।
ये व्यमुञ्चन्त कर्णस्य प्रमादात्त इमे हताः ॥ १०-१०-१६ (६४५१६)
रथह्रदं शरवर्षोर्मिमन्तं
रत्नाचितं वाहनयोधबृन्दम् ।
शक्त्यृष्टिमीनध्वजनागनक्रं
शरासनावर्तमहेषुफेनम् ॥ १०-१०-१७ (६४५१७)
सङ्ग्रामचन्द्रोदयवेगवेलं
द्रोणार्णवं ज्यातलनेमिघोषम् ।

ये तेरुरुच्चावचशस्त्रनौभि--
स्ते राजपुत्रा निहताः प्रमादात् ॥ १०-१०-१८ (६४५१८)
न हि प्रमादात्परमस्ति कश्च--
द्वधो नराणामिह जीवलोके ।
प्रमत्तमर्था हि नरं समन्ता--
त्त्यजन्त्यनर्थाश्च समाविशन्ति ॥ १०-१०-१९ (६४५१९)
ध्वजोत्तमाग्रोच्छ्रितधूमकेतुं
शरार्चिषं दीप्तमहापताकम् ।
महाधनुर्ज्यातलनेमिघोषं
तनुत्रनानाविधशस्त्रहोमम् ॥ १०-१०-२० (६४५२०)
महाचमूकक्षदवाभिपन्नं
महाहवे भीष्ममहादवाग्निम् ।
ये तेरुरुच्चावचशस्त्रवेगै--
स्ते राजपुत्रा निहताः प्रमादात् ॥ १०-१०-२१ (६४५२१)
न हि प्रमत्तेन नरेण शक्य--
माप्तुं वसु श्रीर्विपुलं यशो वा ।
पश्याप्रमादेन निहत्य शत्रू--
न्सर्वान्महेन्द्रं सुखमेधमानम् ॥ १०-१०-२२ (६४५२२)
इन्द्रोपमान्पार्थिवपुत्रपौत्रा--
न्पश्याविशेषेण हतान्प्रमादात् ।
तीर्त्वा समुद्रं जणिजः समृद्धा ।
मग्नाः कुनद्यामिव सीदमानाः ॥ १०-१०-२३ (६४५२३)
अमर्षितैर्ये निहता नरेन्द्रा
निःसंशयं ते त्रिदिवं प्रपन्नाः ।
कृष्णां तु शोचामि कथं नु साध्वी
शोकार्णवं सा विषहिष्यतीति ॥ १०-१०-२४ (६४५२४)
भ्रातृंश्च पुत्रांश्च हतान्निशम्य
पाञ्चालसराजं पितरं च वृद्धम् ।
ध्रुवं विसञ्ज्ञा पतिता पृथिव्यां
सा शोष्यते शोककृशाङ्गयष्टिः ॥ १०-१०-२५ (६४५२५)
तच्छोकजं दुःखमपारयन्ती
कथं भविष्यत्युचिता सुखानाम् ।
रोरूयते ज्ञातिवधाभितप्ता
प्रदह्यमानेव हुताशनेन ॥ १०-१०-२६ (६४५२६)
इत्येवमार्तः परिदेवयन्स
राजाज कुरूणां नकुलं बभाषे ।

गच्छाम्यैनामिह मन्दभाग्यां
समातृपक्षामिति राजपुत्रीम् ॥ १०-१०-२७ (६४५२७)
माद्रीसुतस्तत्परिगृह्य वाक्यं
धर्मेण धर्मप्रथमस्य राज्ञः ।
ययौ रथेनालयमाशुदेव्याः
पाञ्चालराजस्य च यत्र दाराः ॥ १०-१०-२८ (६४५२८)
प्रस्थाप्य माद्रीसुतमाजमीढः
शोकार्दितस्तैः सहितः सुहृद्भिः ।
रोरूयमाणः प्रययौ सुताना--
मायोधनं भूतगणानुकीर्णम् ॥ १०-१०-२९ (६४५२९)
स तत्प्रविश्याशिवमुग्ररूपं
ददर्श पुत्रान्सुहृदः सखींश्च ।
भूमौ शयानान्रुधिरार्द्रगात्रा--
न्विभिन्नदेहान्प्रहृतोत्तमाङ्गान् ॥ १०-१०-३० (६४५३०)
स तांस्तु दृष्ट्वा भृशमार्तरूपो
युधिष्ठिरो धर्मभृतां वरिष्ठः ।
उच्चैः प्रचुक्रोश च कौरवाग्र्यः
पपात चोर्व्यां सगणो विसंज्ञः ॥ ॥ १०-१०-३१ (६४५३१)

इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि दशमोऽध्यायः ॥१० ॥

Mahabharata - Sauptika Parva - Chapter Footnotes

१०-१०-८ xxxxxxxx त्यक्त्वा पतन्तम् ॥
१०-१०-१० अन्ये शत्रवः । जयमानाः जयन्तः। जितानां जयो जयतां पराजयः फलतोऽभूदिति महदाश्चर्यमित्यर्थः ॥
१०-१०-१३ पश्चात्स पाप इव दुर्मतिरिति क पाठः ॥
१०-१०-१६ व्यमुञ्चन्त मुक्ताः । कर्णस्य कर्णात्। प्रमादादस्मत्कृतादसान्निध्यात् ॥
१०-१०-१७ वाहनवाजियुक्तमिति झ पाठः ॥
१०-१०-२० तनुत्राणि नानाषिधानि शस्कराणि च तेषां होमः प्रक्षेपो यत्र तं तनुत्रनानाविधशस्त्रहोमम् ॥
१०-१०-२१ भीष्ममयं भीष्मप्रधानं अग्निदाहम् । भीष्मरूपेण अग्निना दाहमित्यर्थः ॥
१०-१०-२४ निहताः शयाना इति झ पाठः ॥
१०-१०-१० दशमोऽध्यायः ॥

सौप्तिकपर्व - अध्याय ०११
॥ श्रीः ॥
१०.११. अध्यायः ११

Mahabharata - Sauptika Parva - Chapter Topics
नकुलेन युधिष्ठिरसमोषं प्रति द्रौपथानयनम् ॥ १ ॥
द्रौपद्या द्रौणिमस्तकमणिहरणचोदितेन भीमेन नकुलसारथिना
रथेन द्रौणिवध्राय प्रस्थानम् ॥ २ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-११-० (६४५३२)
वैशम्पायन उवाच। १०-११-०क्ष् (५२८६)
स दृष्ट्वा निहतान्सङ्ख्ये पुत्रान्पात्रौन्सखींस्तथा ।
महादुःखपरीतात्मा बभूव जनमेजय ॥ १०-११-१ (६४५३३)
ततस्तस्य महाञ्शोकः प्रादुरासीन्महात्मनः ।
स्मरतः पुत्रपौत्रांस्तान्भ्रातॄन्सुहृद एव च ॥ १०-११-२ (६४५३४)
तमश्रुपरिपूर्णाक्षं वेपमानमचेतसम् ।
सुहृदो भृशसंविग्नाः सांत्वयाञ्चक्रिरे तदा ॥ १०-११-३ (६४५३५)
ङ्कृत्वा तु विधिवत्तेषां पुत्राणाममितौजसाम् ।
प्रेतकार्याणि सर्वेषां बभूव भृशदुःखितः'॥ १०-११-४ (६४५३६)
तस्मिन्मुहूर्ते जवनैर्वाजिभिर्हेममालिभिः ।
नकुलः कृष्णया सार्धमुपायात्परमार्तया ॥ १०-११-५ (६४५३७)
उपप्लाव्यं गता सा तु श्रुत्वा सुमहदप्रियम् ।
तदा विनाशं सर्वेषां पुत्राणां व्यथितेन्द्रिया ॥ १०-११-६ (६४५३८)
कम्पमानेव कदली वातेनाभिसमीरिता ।
कृष्णा राजानमासाद्य शोकार्ता न्यपतद्भुवि ॥ १०-११-७ (६४५३९)
न बभौ वदनं तस्या रुदन्त्याः शोककर्शितम् ।
फुल्लपद्मपलाशाक्ष्या मेघावृत इवोडुराट् ॥ १०-११-८ (६४५४०)
ततस्तां पतितां दृष्ट्वा संरम्भी सत्यविक्रमः ।
वाहुभ्यां परिजग्राह समुत्पत्य वृकोदरः ॥ १०-११-९ (६४५४१)
सा समाश्वासिता तेन भीमसेनेन भामिनी ।
रुदती पाण्डवज्येष्ठमिदं वचनमब्रवीत् ॥ १०-११-१० (६४५४२)
दिष्ट्या राजन्नवाप्येमामखिलां भोक्ष्यसे महीम् ।
आत्मजान्क्षत्रधर्मेण सम्प्रदाय यमाय वै ॥ १०-११-११ (६४५४३)
दिष्ट्या सर्वास्त्रकुशलं मत्तमातङ्गामिनम् ।

अवाप्य पृथिवीं कृत्स्नां सौभद्रं न स्मरिष्यसि ॥ १०-११-१२ (६४५४४)
आत्मजान्क्षत्रधर्मेण श्रुत्वा शूरान्निपातितान् ।
स्थितो राज्ये मया सार्धं विहरन्न स्मरिष्यसि ॥ १०-११-१३ (६४५४५)
प्रसुप्तानां वधं श्रुत्वा द्रौणिना पापकर्मणा ।
शोको मां दहते गाढो हुताशन इवाश्रयम् ॥ १०-११-१४ (६४५४६)
तस्य पापकृतो द्रौणेर्न चेदद्य दुरात्मनः ।
ह्रियते सानुबन्धस्य युधि विक्रम्य जीवितम् ॥ १०-११-१५ (६४५४७)
इहैव प्रायमासिष्ये तन्निबोधत पाण्डवाः ।
न चेत्फलमवाप्नोति द्रौणिः पापस्य कर्मणः ॥ १०-११-१६ (६४५४८)
एवमक्त्वा ततः कृष्णा पाण्डवं प्रत्युपाविशत् ।
युधिष्ठिरं याज्ञसेनी धर्मराजं यशस्विनी ॥ १०-११-१७ (६४५४९)
दृष्ट्वोपविष्टां राजा तु पाण्डवो महिषीं प्रियाम् ।
प्रत्युवाच स धर्मात्मा द्रौपदीं चारुदर्शनाम् ॥ १०-११-१८ (६४५५०)
क्षत्रधर्मेण धर्मज्ञे प्राप्तास्ते निधनं शुभे ।
पुत्रास्ते भ्रातरश्चैव तान्न शोचितुमर्हसि ॥ १०-११-१९ (६४५५१)
स कल्याणि वनं दुर्गं दूरं द्रौणिरितो गतः ।
तस्य त्वं पातनं सङ्ख्ये कथं ज्ञास्यसि शोभने ॥ १०-११-२० (६४५५२)
द्रौपद्युवाच। १०-११-२१क्ष् (५२८७)
द्रोणपुत्रस्य सहजो मणिः शिरसि मे श्रुतः ।
निहत्य सङ्ख्ये तं पापं पश्येयं मणिमाहृतम् ।
द्रौणेः शिरस उत्कृत्य जीवेयमिति मे मतिः ॥ १०-११-२१ (६४५५३)
इत्युक्त्वा पाण्डवं कृष्णा राजानं चारुदर्शना ।
भीमसेनकरे स्पृष्ट्वा कुपिता वाक्यमब्रवीत् ॥ १०-११-२२ (६४५५४)
त्रातुमर्हसि मां भीम क्षत्रधर्ममनुस्मरन् ।
जहि तं पापकर्माणं शम्बरं सघवानिव ॥ १०-११-२३ (६४५५५)
न हि ते विक्रमे तुल्यः पुमानस्तीह कश्चन ।
श्रुतं तत्सर्वलोकेषु परमव्यसने तथा ॥ १०-११-२४ (६४५५६)
द्वीपोऽभूस्त्वं हि पार्थानां नगरे वारणावते ।
हिडिम्बदर्शने चैव तथां त्वमभवो गतिः ॥ १०-११-२५ (६४५५७)
तथा विराटनगरे कीचकेन भृशार्दिताम् ।
मामप्युद्धृतवान्कृच्छ्रात्पौलोमीं मघवानिव ॥ १०-११-२६ (६४५५८)
यथैतान्यकृथाः पार्थ महाकर्माणि वै पुरा ।
तथा द्रौणिममित्रघ्न विनिहत्य सुखी भव ॥ १०-११-२७ (६४५५९)
वैशम्पायन उवाच। १०-११-२८क्ष् (५२८८)
तस्या बहुविधं दुःखं निशम्य परिदेवितम् ।
न चामर्षत कौन्तेयो भीमसेनो महाबलः ॥ १०-११-२८ (६४५६०)

स काञ्चनविचित्राङ्गमारुरोह महारथम् ।
आदाय रुचिरं चित्रं समार्गणगुणं धनुः ॥ १०-११-२९ (६४५६१)
नकुलं सारथिं कृत्वा द्रोणपुत्रवधे धृतः ।
विस्फार्य सशरं चापं तूर्णमश्वानचोदयत् ॥ १०-११-३० (६४५६२)
ते हयाः पुरुषव्याघ्र दीप्यमानाः स्वतेजसा ।
वहन्तः सहसा जग्मुर्हरयः शीघ्रगामिनः ॥ १०-११-३१ (६४५६३)
शिबिरात्स्वाद्गृहीत्वा स रथस्य पदमच्युतः ।
ग्द्रोणपुत्रगतेनाशु ययौ मार्गेण भारत'॥ ॥ १०-११-३२ (६४५६४)

इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि एकादशोऽध्यायः ॥ ११ ॥
Mahabharata - Sauptika Parva - Chapter Footnotes

१०-११-११ दिष्ट्येति ।पुत्रनाशापेक्षया राज्यप्राप्तिसुखं तव
महदित्यधिक्षेपः ॥
१०-११-११ एकादशोऽध्यायः ॥

सौप्तिकपर्व - अध्याय ०१२
॥ श्रीः ॥
१०.१२. अध्यायः १२

Mahabharata - Sauptika Parva - Chapter Topics
द्रौणिजिघांसया भीमे प्रतिगते कृष्णेन युधिष्ठिरम्प्रति
द्रौणिदौश्शील्यादिकथनपूर्वकं भीमस्य ततो रक्षणीयत्वकथनम्
॥ १ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-१२-० (६४५६५)
वैशम्पायन उवाच।१०-१२-०क्ष् (५२८९)
तस्मिन्प्रयाते दुर्धर्षे यदूनामृषभस्ततः ।
अब्रवीत्पुण्डरीकाक्षः कुन्तीपुत्रं युधिष्ठिरम् ॥ १०-१२-१ (६४५६६)
एष पाण्डवे ते भ्राता पुत्रशोकपरायणः ।
जिघांसुर्द्रौणिमाक्रन्दे एक एवाभिधावति ॥ १०-१२-२ (६४५६७)
भीमः प्रियस्ते सर्वेभ्यो भ्रातृभ्यो भरतर्षभ ।
तं कृच्छ्रगतमद्य त्वं कस्मान्नाभ्युपपद्यसे ॥ १०-१२-३ (६४५६८)
यत्तदाचष्ट पुत्राय द्रोणः परपुरञ्जयः ।

अस्त्रं ब्रह्मशिरो नाम दहेत पृथिवीमपि ॥ १०-१२-४ (६४५६९)
तन्महात्मा महाभागः केतुः सर्वधनुष्मताम् ।
प्रत्यपायदाचार्यः प्रीयमाणो धनञ्जयम् ॥ १०-१२-५ (६४५७०)
तं पुत्रोऽप्येक एवैनमन्वयाचदमर्षणः ।
ततः प्रोवाच पुत्राय नातिहृष्टमना इव ॥ १०-१२-६ (६४५७१)
विदितं चापलं ह्यासीदात्मजस्य दुरात्मनः ।
सर्वधर्मविदाचार्यः सोऽन्वशासत्सुतं ततः ॥ १०-१२-७ (६४५७२)
परमापद्गतेनापि न स्म तात त्वया रणे ।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ॥ १०-१२-८ (६४५७३)
इत्युक्त्वान्गुरुः पुत्रं द्रोणः पश्चाथोक्तवान् ।
न त्वं जातु सतां मार्गे स्थातेति पुरुषर्षभ ॥ १०-१२-९ (६४५७४)
स तदाज्ञाय दुष्टात्मा पितुर्वचनमप्रियम् ।
निराशः सर्वकल्याणैः शोकात्पर्यचरन्महीम् ॥ १०-१२-१० (६४५७५)
ततस्तदा कुरुश्रेष्ठ वनस्थे त्वयि भारत ।
अवसद्द्वारकामेत्य वृष्णिभिः परमार्चितः ॥ १०-१२-११ (६४५७६)
स कदाचित्समुद्रान्ते वसन्द्वारवतीमनु ।
एक एकं समागम्य मामुवाच हसन्निव ॥ १०-१२-१२ (६४५७७)
यत्तदुग्रं तपः कृष्ण चरन्नमितविक्रमः ।
अगस्त्याद्भारताचार्यः प्रत्यपद्यत मे पिता ॥ १०-१२-१३ (६४५७८)
अस्त्रं ब्रह्मशिरो नाम देवगन्धर्वपूजितम् ।
तदद्य मयि दाशार्ह यथा पितरि मे तथा ॥ १०-१२-१४ (६४५७९)
अस्मत्तस्तदुपादाय दिव्यमस्त्रं यदूत्तम ।
ममाप्यस्त्रं प्रयच्छ त्वं चक्रं रिपुहणं रणे ॥ १०-१२-१५ (६४५८०)
स राजन्प्रीयमाणेन मयाप्युक्तः कृताञ्जलिः ।
याचमानः प्रयत्नेन मत्तोऽस्त्रं भरतर्षभ ॥ १०-१२-१६ (६४५८१)
देवदानवगन्धर्वमनुष्यपतगोरगाः ।
न समा मम वीर्यस्य शतांशेनापि पिण्डिताः ॥ १०-१२-१७ (६४५८२)
इदं धनुरियं शक्तिरिदं चक्रमियं गदा ।
यद्यदिच्छसि चेदस्त्रं मत्तस्तत्तद्ददामि ते ॥ १०-१२-१८ (६४५८३)
यच्छक्नोषि समुद्यन्तुं प्रयोक्तुमपि वा रणे ।
तद्गृहाण विनाऽस्त्रेण यन्मे दातुमभीप्ससि ॥ १०-१२-१९ (६४५८४)
स सुनाभं सहस्रारं वज्रनाभमयस्मयम् ।
वव्रे चक्रं महाभागो मत्तः स्पर्धन्मया सह ॥ १०-१२-२० (६४५८५)
गृहाण चक्रमित्युक्तो मया तु तदनन्तरम् ।
जग्राहोत्पत्य सहसा चक्रं सव्येन पाणिना ॥ १०-१२-२१ (६४५८६)
न चैनमशकत्स्थानात्सञ्चालयितुमप्युत ।

अथैनं दक्षिणेनापि ग्रहीतुमुपचक्रमे ॥ १०-१२-२२ (६४५८७)
सर्वयत्नेन तेनापि गृह्य नैनमकम्पयत् ॥ १०-१२-२३ (६४५८८)
ततः सर्वबलेनापि यदैनं न शशाक ह ।
उद्यन्तुं वा चालयितुं द्रौणिः परमदुर्मनाः ।
कृत्वा यत्नं परिश्रान्तः स न्यवर्तत भारत ॥ १०-१२-२४ (६४५८९)
निवृत्मनसं तस्मादभिप्रायाद्विचेतसम् ।
अहमामन्त्र्य संविग्नमश्वत्थामानमब्रुवम् ॥ १०-१२-२५ (६४५९०)
यः स दैवमनुष्येषु प्रमाणं परमं गतः ।
गाण्डीवधन्वा श्वेताश्वः कपिप्रवरकेतनः ॥ १०-१२-२६ (६४५९१)
यः साक्षाद्देवदेवेशं शितिकण्ठमुमापतिम् ।
द्वन्द्वयुद्धे पुरा जिष्णुस्तोषयामास शङ्करम् ॥ १०-१२-२७ (६४५९२)
यस्मात्प्रियतरो नास्ति ममान्यः पुरुषो भुवि ।
नादेयं यस्य मे किञ्चिदपि प्राणान्महात्मनः ॥ १०-१२-२८ (६४५९३)
तेनापि सुहृदा ब्रह्मन्पार्थेनाक्लिष्टकर्मणा ।
नोक्पूर्वमिदं वाक्यं यस्त्वं मामभिभाषसे ॥ १०-१२-२९ (६४५९४)
ब्रह्मचर्यं महद्धोरं तीर्वा द्वादशवार्षिकम् ।
हिमवत्पार्श्वमास्थाय यो मया तपसाऽऽर्जितः ॥ १०-१२-३० (६४५९५)
समानव्रतचारिण्यां रुक्मिण्यां योऽन्वजायत ।
सनत्कुमारस्तेजस्वी प्रद्युम्नो नाम मे सुतः ॥ १०-१२-३१ (६४५९६)
तेनाप्येतन्महद्दिव्यं चक्रमप्रतिमं रणे ।
न प्रार्थितमभून्मूढ तदितं प्रार्थितं त्वया ॥ १०-१२-३२ (६४५९७)
रामेणातिबलेनैतन्नोक्तपूर्वं कदाचन ।
न गदेन साम्बेन यदिदं प्रार्थितं त्वया ॥ १०-१२-३३ (६४५९८)
द्वारकावासिभिश्चान्यैर्वृष्ण्यन्धकमहारथैः ।
नोक्तपूर्वमिदं क्षुद्रं तदिदं प्रार्थितं त्वया ॥ १०-१२-३४ (६४५९९)
भारताचार्यपुत्रस्त्वं मानितः सर्वयादवैः ।
चक्रेण रथिनां श्रेष्ठ कं नु तात युयुत्ससे ॥ १०-१२-३५ (६४६००)
एवमुक्तो मया द्रौणिर्मामिदं प्रत्युवाच ह ।
प्रयुज्य भवते पूजां योत्स्ये कृष्ण त्वया सह ॥ १०-१२-३६ (६४६०१)
प्रार्थितं ते मया चक्रं देवदानवपूजितम् ।
अजेयः स्यामिति विभो सत्यमेद्ब्रवीमि ते ॥ १०-१२-३७ (६४६०२)
सोऽहं तद्दुर्लभं चक्रमनवाप्यैव केशव ।
प्रतियास्यामि गोविन्द शिवेनाभिवदस्व माम् ॥ १०-१२-३८ (६४६०३)
एतत्सुनाभं भोजानामृषभेण त्वया धृतम् ।
चक्रमप्रतिचक्रेण भुवि नान्योऽभिपद्यते ॥ १०-१२-३९ (६४६०४)
एतावदुक्त्वा द्रौणिर्मां युग्यानश्वान्धनानि च ।

आदायोपययौ काले रत्नानि विविधानि च ॥१०-१२-४० (६४६०५)
स संरम्भी दुरात्मा च चपलः क्रूर एव च ।
वेद चास्त्रं ब्रह्मशिरस्तस्माद्रक्ष्यो वृकोदरः ॥ ॥१०-१२-४१ (६४६०६)

इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि द्वाशोऽध्यायः ॥१२ ॥

Mahabharata - Sauptika Parva - Chapter Footnotes

१०-१२-११ मे मह्यं दातुमिच्छसि तेन विनापि गृहाण ।त्वदीयेऽस्त्रे ममेच्छा नास्तीति भावः ॥
१०-१२-१२ द्वादशोऽध्यायः ॥

सौप्तिकपर्व - अध्याय ०१३
॥ श्रीः ॥
१०.१३. अध्यायः १३

Mahabharata - Sauptika Parva - Chapter Topics

कृष्णादिभिर्भागीरथीतीरे व्याससमीपसमासीनद्रौणिदर्शनम् ॥१ ॥
तद्दर्शिना द्रौणिना अपाण्डवहेतोर्ब्रह्मशिरोस्त्रप्रयोगः ॥२ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-१३-० (६४६०७)
वैशम्पायन उवाच।१०-१३-०क्ष् (५२९०)
एवमुक्त्वा कुरुश्रेष्ठं सर्वयादवनन्दनः ।
सर्वायुधवरोपेतमारुरोह रथोत्तमम् ॥१०-१३-१ (६४६०८)
युक्तं परमकाम्भोजैस्तुरगैर्हेममालिभिः ।
उदितादित्यसङ्काशं सर्वरत्नविभूषितम् ॥१०-१३-२ (६४६०९)
दक्षिणे ह्यावहच्छैब्यः सुग्रीवः सव्यतो धुरम् ।
पार्ष्णिवाहौ तु तस्यास्तां मेघपुष्पबलाहकौ ॥१०-१३-३ (६४६१०)
विश्वकर्मकृता दिव्या रत्नधातुविभूषिता ।
उच्छ्रिता च रथे तस्मिन्ध्वजयष्टिरदृश्यत ॥१०-१३-४ (६४६११)
वैनतेयः स्थितस्तस्यां प्रभामण्डलरश्मिवान् ॥
तस्य सत्यवतः केतुर्भुजगारिरदृश्यत ॥१०-१३-५ (६४६१२)
अथारोहद्धृषीकेशः केतुः सर्वधनुष्मताम् ।
अर्जुनः स च धर्मात्मा कुरुराजो युधिष्ठिरः ॥१०-१३-६ (६४६१३)
अशोभेतां महात्मानौ दाशार्हमभितः स्थितौ ।

रथस्थं शार्ङ्गधन्वानमश्विनाविव वासवम् ॥ १०-१३-७ (६४६१४)
उभावारोप्य दाशार्हः स्यन्दनं लोकपूजितम् ।
प्रतोदेन जवोपेतान्परमाश्वानचोदयत् ॥ १०-१३-८ (६४६१५)
ते हयाः सहसोत्पेतुर्गृहीत्वा स्यन्दनोत्तमम् ।
आस्थितं पाण्डवेयाभ्यां यदूनामृषभेण च ॥ १०-१३-९ (६४६१६)
वहतां शार्ङ्गधन्वानमश्वानां शीघ्रगामिनाम् ।
प्रादुरासीन्महाञ्शब्दः पक्षिणां पततामिव ॥ १०-१३-१० (६४६१७)
ते समर्था महाबाहुं क्षणेन भरतर्षभ ।
भीमसेनं महेष्वासमनुसस्रुः सुवेगिताः ॥ १०-१३-११ (६४६१८)
क्रोधदीप्तं तु कौन्तेयं द्विषदर्थे समुद्यतम् ।
नाशक्नुवन्वारयितुं समेत्यापि महारथाः ॥ १०-१३-१२ (६४६१९)
स तेषामग्रतः शूरः श्रीमतां दृढधन्विनाम् ।
ययौ भागीरथीतीरं हरिभिर्भृशवेगितैः ।
यत्र स श्रूयते द्रौणिः पुत्रहन्ता दुरात्मवान् ॥ १०-१३-१३ (६४६२०)
स ददर्श महात्मानमुदकान्ते यशस्विनम् ।
कृष्णद्वैपायनं व्यासमासीनमृषिभिः सह ॥ १०-१३-१४ (६४६२१)
तं चैव क्रूरकर्माणं घृताक्तं कुशचीरिणम् ।
रजसा ध्वस्तमासीनं ददर्श द्रौणिमन्तिके ॥ १०-१३-१५ (६४६२२)
तमभ्यधावत्कौन्तेयः प्रगृह्य सशरं धनुः ।
भीमसेनो महाबाहुस्तिष्ठतिष्ठेति चाब्रवीत् ॥ १०-१३-१६ (६४६२३)
तं दृष्ट्वा भीमकर्माणं प्रगृहीतशरासनम् ।
भ्रातरौ पृष्ठतश्चास्य जनार्दनरथे स्थितौ ।
व्यथितात्माऽभवद्द्रौणिः प्राप्तं चेदममन्यत ॥ १०-१३-१७ (६४६२४)
स तद्दिव्यमदीनात्मा परमास्त्रमचिन्तयत् ।
जग्राह च शरैषीकां द्रौणिः सव्येन पाणिना ॥ १०-१३-१८ (६४६२५)
स तामापदमासाद्य दिव्यमस्त्रमुदैरयत् ।
अमृष्यमाणस्ताञ्छूरान्दिव्यायुधधरान्स्थितान् ।
अपाण्डवायेति रुषा वाचमुत्सृज्य दारुणम् ॥ १०-१३-१९ (६४६२६)
इत्युक्त्वा राजशार्दूल द्रोणपुत्रः प्रतापवान् ।
सर्वलोकप्रमोहार्थं तदस्त्रं प्रमुमोच ह ॥ १०-१३-२० (६४६२७)
ततस्तस्यामिषीकायां पावकः समजायत ।
प्रधक्ष्यन्निव लोकांस्त्रीन्कालान्कयमोपमः ॥ ॥ १०-१३-२१ (६४६२८)

इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि त्रयोधशोऽध्यायः ॥ १३ ॥

Mahabharata - Sauptika Parva - Chapter Footnotes

१०-१३-१९ अपाण्डवाय पाण्डवानामभावाय ॥
१०-१३-१३ त्रयोदशोऽध्यायः ॥

सौप्तिकपर्व - अध्याय ०१४
॥ श्रीः ॥
१०.१४. अध्यायः १४

Mahabharata - Sauptika Parva - Chapter Topics
अर्जुनेन कृष्णाज्ञया द्रौण्यस्त्रप्रत्यस्त्रप्रयोगः ॥ १ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-१४-० (६४६२९)
वैशम्पायन उवाच। १०-१४-०क्ष् (५२९१)
इङ्गितेनैव दाशार्हस्तस्याभिप्रायमादितः ।
द्रौणेर्बुद्धा महाबाहुरर्जुनं प्रत्यभाषत ॥ १०-१४-१ (६४६३०)
अर्जुनार्जुन यद्दिव्यमस्त्रं ते हृदि वर्तते ।
द्रोणोपदिष्टं तस्यायं कालः सम्प्रति पाण्डव ॥ १०-१४-२ (६४६३१)
भ्रातॄणामात्मनश्चैव परित्राणाय भारत ।
विसृजैतत्त्वमप्याजावस्त्रमस्त्रनिवारणम् ॥ १०-१४-३ (६४६३२)
केशवेनैवमुक्तोऽथ पाण्डवः परवीरहा ।
अवातरद्रथात्तूर्णं प्रगृह्य सशरं धनुः ॥ १०-१४-४ (६४६३३)
पूर्वमाचार्यपुत्राय ततोऽनन्तरमात्मने ।
भ्रातृभ्यश्चैव सर्वेभ्यः स्वस्तीत्युक्त्वा परन्तपः ॥ १०-१४-५ (६४६३४)
देवताभ्यो नमस्कृत्य गुरुभ्यश्चैव सर्वशः ।
उत्ससर्ज शिवं ध्यायन्नस्त्रमस्त्रेण शाम्यताम् ॥ १०-१४-६ (६४६३५)
ततस्तदस्त्रं सहसा सृष्टं गाण्डीवधन्वना ।
प्रजज्वाल महार्चिष्मद्युगान्तानलसन्निभम् ॥ १०-१४-७ (६४६३६)
तथैव द्रोणपुत्रस्य तदस्त्रं तिग्मतेजसः ।
प्रजज्वाल महाज्वालं तेजोमण्डलसंवृतम् ॥ १०-१४-८ (६४६३७)
निर्घाता बहवश्चासन्पेतुरुल्काः सहस्रशः ।
महद्भयं च भूतानां सर्वेषां समजायत ॥ १०-१४-९ (६४६३८)
सशब्दमभवद्व्योम ज्वालामालाकुलं भृशम् ।
चचाल च मही कृत्स्ना सपर्वतवनद्रुमा ॥ १०-१४-१० (६४६३९)
तावस्त्रतेजसा लोकांस्त्रासयन्तौ ततः स्थितौ ।

महर्षी सहितौ तत्र दर्शयामासतुस्तदा ॥ १०-१४-११ (६४६४०)
नारदः सर्वधर्मात्मा भरतानां पितामहः ।
उभौ शमयितुं वीरौ भारद्वाजधनञ्जयौ ॥ १०-१४-१२ (६४६४१)
तौ मुनी सर्वधर्मज्ञौ सर्वभूतहितैषिणौ ।
दीप्तयोरस्त्रयोर्मध्ये स्थितौ परमतेजसौ ॥ १०-१४-१३ (६४६४२)
तदन्तरमनाधृष्यावुपगम्य यशस्विनौ ।
आस्तामृषिवरौ तत्र ज्वलिताविव पावकौ ॥ १०-१४-१४ (६४६४३)
प्राणभृद्भिरनाधृष्यौ देवदानवसम्मतौ ।
अस्त्रतेजः शमयितुं लोकानां हितकाम्यया ॥ १०-१४-१५ (६४६४४)
ऋषी ऊचतुः। १०-१४-१६क्ष् (५२९२)
महास्त्रविदुषः पूर्वे येऽप्यतीता महारथाः ।
नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन ।
किमिदं साहसं वीरौ कृतवन्तौ महात्ययम् ॥ ॥ १०-१४-१६ (६४६४५)

इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वमि चतुर्दशोऽध्यायः
॥ १४ ॥

सौप्तिकपर्व - अध्याय ०१५
॥ श्रीः ॥
१०.१५. अध्यायः १५

Mahabharata - Sauptika Parva - Chapter Topics
अर्जुनेन व्यासनारदभावानुरोधेन स्वप्रयुक्तब्रह्मशिरोस्त्रप्रतिसंहारः
॥ १ ॥
कृष्णेनाश्वत्थामानं प्रति उत्तरागर्भे ऐषीकास्त्रपातेऽपि
मृतशिशोः स्वेन समुज्जीवनप्रतिज्ञा ॥ २ ॥
ब्रह्मचर्याभावादस्त्रप्रतिसंहारासमर्थेन द्रौणिना
व्यासकृष्णावनादृस्य पाण्वगर्भेष्वैषीकास्त्रोत्सर्जनम् ॥ ३ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-१५-० (६४६४६)
वैशम्पायन उवाच। १०-१५-०क्ष् (५२९३)
दृष्टैव मुनिशार्दूलौ तावग्निसमतेजसौ ।
ग्गाण्डीवधन्वा सञ्चिन्त्य प्राप्तकालं महारथः।'
सञ्जहार शरं दिव्यं त्वरमाणो धनञ्जयः ॥ १०-१५-१ (६४६४७)

उवाच वचनं श्रेष्ठस्तावृषी प्राञ्जलिस्तदा ।
प्रमुक्तमस्त्रमस्त्रेण शाम्यतामिति वै मया ॥ १०-१५-२ (६४६४८)
संहृते परमास्त्रेऽस्मिन्सर्वानस्मानशेषतः ।
पापकर्मा ध्रुवं द्रौणिः प्रधक्ष्यत्यस्त्रतेजसा ॥ १०-१५-३ (६४६४९)
यदत्र हितमस्माकं लोकानां चैव सर्वथा ।
भवन्तौ देवसङ्काशौ तथा सम्मन्तुमर्हतः ॥ १०-१५-४ (६४६५०)
इत्युक्त्वा सञ्जहारास्त्रं पुनरेव धनञ्जयः ।
संहारो दुष्करस्स्य देवैरपि हि संयुगे ॥ १०-१५-५ (६४६५१)
विसृष्टस्य रणे तस्य परमास्त्रस्य सङ्ग्रहे ।
अशक्तः पाण्डवादन्यः साक्षादपि शतक्रतुः ॥ १०-१५-६ (६४६५२)
ब्रह्मतेजोद्भवं तद्धि विसृष्टमकृतात्मना ।
न शक्यमावर्तयितुं ब्रह्मचर्यव्रतादृते ॥ १०-१५-७ (६४६५३)
अचीर्णब्रह्मचर्यो यः सृष्ट्वाऽऽवर्यते पुनः ।
तदस्त्रं सानुबन्धस्य मूर्धानं तस्य कृन्तति ॥ १०-१५-८ (६४६५४)
ब्रह्मचारी व्रती चापि दुरवापमवाप्य तत् ।
परमव्यसनार्तोऽपि नार्जुनोऽस्त्रं व्यमुञ्चत ॥ १०-१५-९ (६४६५५)
सत्यव्रतधरः शूरो ब्रह्मचारी च पाण्डवः ।
गुरुवर्ती च तेनास्त्रं सञ्जहारार्जुनः पुनः ॥ १०-१५-१० (६४६५६)
द्रौणिरप्यथ सम्प्रेक्ष्य सोऽन्तरा तावृषी स्थितौ ।
न शशाक पुनर्घोरमस्त्रं संहर्तुमोजसा ॥ १०-१५-११ (६४६५७)
अशक्तः प्रतिसंहारे परमास्त्रस्य संयुगे ।
द्रौणिर्दीनमना राजन्द्वैपायनमभाषत ॥ १०-१५-१२ (६४६५८)
उत्तमव्यसनार्तेन प्राणत्राणमभीप्सुना ।
मयैतदस्त्रमुत्सृष्टं भीमसेनभयान्मुने ॥ १०-१५-१३ (६४६५९)
अधर्मश्च कृतोऽनेन धार्तराष्ट्रं जिघांसता ।
मिथ्याचारेण भगवन्भीमसेनेन संयुगे ॥ १०-१५-१४ (६४६६०)
अतः सृष्टमिदं ब्रह्मन्मयाऽस्त्रमकृतात्मना ।
तस्य भूयोऽपि संहारं कर्तुं नाहमिहोत्सहे ॥ १०-१५-१५ (६४६६१)
निसृष्टं हि मया दिव्यमेतदस्त्रं दुरासदम् ।
अपाण्डवायेति मुने वह्नितेजोऽनुमन्त्र्य वै ॥ १०-१५-१६ (६४६६२)
तदिदं पाण्डवेयानामन्तायैवाभिसंहितम् ।
अद्य पाण्डुसुतान्सर्वाञ्जीविताद्भ्रंशयिष्यति ॥ १०-१५-१७ (६४६६३)
कृतं पापमिदं ब्रह्मन्रोषाविष्टेन चेतसा ।
वधमाशास्य पार्थानां मयास्त्रं सृजता रणे ॥ १०-१५-१८ (६४६६४)
व्यास उवाच। १०-१५-१९ (६४६६५)
अस्त्रं ब्रह्मशिरस्तात विद्वान्पार्थो धनञ्जयः ।

उत्सृष्टवानहिंसार्थं न रोषेण तवाहवे ॥ १०-१५-१९ (६४६६६)
अस्त्रमस्त्रेण तु रमे तव संशमयिष्यता ।
विसृष्टमर्जुनेनेदं पुनश्च प्रतिसंहृतम् ॥ १०-१५-२० (६४६६७)
ब्रह्मास्त्रमप्यवाप्यैतदुपदेशात्पितुस्तव ।
क्षत्रधर्मान्महाबाहुर्नाकम्पत धनञ्जयः ॥ १०-१५-२१ (६४६६८)
एवं धृतिमतः साधोः सर्वास्त्रविदुषः सतः ।
सभ्रातृबन्धोः कस्मात्त्वं वधमस्य चिकीर्षसि ॥ १०-१५-२२ (६४६६९)
अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते ।
समा द्वादश पर्जन्यस्तद्राष्ट्रं नाभिवर्षति ॥ १०-१५-२३ (६४६७०)
एतदर्थं महाबाहुः शक्तिमानपि पाण्डवः ।
न विहन्यात्तदस्त्रं तु प्रजाहितचिकीर्षया ॥ १०-१५-२४ (६४६७१)
पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव नः ।
तस्मात्संहर दिव्यं त्वमस्त्रमेन्महाभुज ॥ १०-१५-२५ (६४६७२)
अरोषस्तव चैवास्तु पार्थाः सन्तु निरामयाः ।
न ह्यधर्मेण राजर्षिः पाण्डवो जेतुमिच्छति। १०-१५-२६ (६४६७३)
मणिं चैव प्रयच्छाद्य यस्ते शिरसि तिष्ठति ।
एतदादाय ते प्रामान्प्रतिदास्यन्ति पाण्डवाः ॥ १०-१५-२७ (६४६७४)
द्रौणिरुवाच। १०-१५-२८क्ष् (५२९४)
पाण्डवैर्यानि रत्नानि यच्चान्यत्कौरवैर्धनम् ।
अवाप्तमिह तेभ्योऽयं मणिर्मम विशिष्यते ॥ १०-१५-२८ (६४६७५)
यमाबध्य भयं नास्ति शस्त्रव्याधिक्षुधाश्रयम् ।
देवेभ्यो दानवेभ्यो वा नागेभ्यो वा कथञ्चन ॥ १०-१५-२९ (६४६७६)
न च रक्षोगणभयं न तस्करभयं तथा ।
एवंवीर्यो मणिरयं न मे त्याज्यः कथञ्चन ॥ १०-१५-३० (६४६७७)
यत्तु मे भगवानाह तन्मे कार्यमनन्तरम् ।
अयं मणिरयं चाहमिषीका तु पतिष्यति ।
गर्भेषु पाण्डुपुत्राणामुत्रायास्तथोदरे ॥ १०-१५-३१ (६४६७८)
वैशम्पायन उवाच। १०-१५-३२क्ष् (५२९५)
प्राह द्रोणसुतं तत्र व्यासः परमदुर्मनाः ॥ १०-१५-३२ (६४६७९)
एवं कुरु न चान्यत्र बुद्धिः कार्या कथञ्चन ।
गर्भेषु पाण्डवेयानां विसृज्यैतदुपारम ॥ १०-१५-३३ (६४६८०)
ग्तमुवाच हृषीकेशः पाण्डवानां हिते मतः ।
भविष्यमेकमुत्सृज्य गर्भेष्वस्त्रं निपात्यताम् ॥ १०-१५-३४ (६४६८१)
अहमेनं ददाम्येषां पिण्डदं कीर्तिवर्धनम् ।
राजर्षिं पुण्यकर्माणमनेकक्रतुयाजिनम् ॥ १०-१५-३५ (६४६८२)
एवं कुरु न चान्या ते बुद्धिः कार्या कथञ्चन ।

आगर्भात्पाण्डवेयानां कृत्वा पातं विनङ्क्ष्यति'॥ १०-१५-३६ (६४६८३)
एवं ब्रुवाणं गोविन्दं वृषभं सर्वसात्वताम् ।
द्रौणिः परमसङ्क्रुद्धः प्रत्युवाचेदमुत्तरम् ॥ १०-१५-३७ (६४६८४)
नैतदेवं यदात्थ त्वं पक्षपातेन केशव ।
वचनात्पुण्डरीकाक्ष तव मद्वाक्यमन्यथा ॥ १०-१५-३८ (६४६८५)
पतिष्यत्येतदस्त्रं वै गर्भे तस्या मयोद्यतम् ।
विराटदुहितुः कृष्ण यं त्वं रक्षितुमर्हसि ॥ १०-१५-३९ (६४६८६)
वासुदेव उवाच। १०-१५-४०क्ष् (५२९६)
अमोघः परमास्त्रस्य पातस्त्वद्य भविष्यति ।
ग्अभिमन्योः सृजैषीकां गर्भस्थः शाम्यतां शिशुः ॥ १०-१५-४० (६४६८७)
अहमेनं मृतं जातं जीवयिष्यामि बालकम्'।
स तु गर्भो मृतो जातो दीर्घमायुरवाप्स्यति ॥ १०-१५-४१ (६४६८८)
ग्इत्युक्तः प्रत्युवाचैनं द्रोणपुत्रः स्मयन्निव ।
यद्यस्त्रदग्धं गोविन्द जीवयस्येवमस्त्विति'॥ १०-१५-४२ (६४६८९)
ततः परममस्त्रं तु द्रौणिरुद्यतमाहवे ।
द्वैपायनमनादृत्य गर्भेषु प्रमुमोच ह ॥ ॥ १०-१५-४३ (६४६९०)

इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥
Mahabharata - Sauptika Parva - Chapter Footnotes

१०-१५-८ आवर्तयते उपसंहरति ॥
१०-१५-२७ एवं जीवितमादाय तव यास्यन्ति पाण्डवाः । इति क पाठः ॥
१०-१५-२९ मम वध्यमयं नास्तीति क पाठः ॥
१०-१५-१५ पञ्चदशोऽध्यायः ॥

सौप्तिकपर्व - अध्याय ०१६
॥ श्रीः ॥
१०.१६. अध्यायः १६

Mahabharata - Sauptika Parva - Chapter Topics
कृष्णेन स्ववचनोल्लङ्घनेनास्त्रप्रयोक्तुरश्वत्थाम्नः शापदानां
व्यासेन तदनुमोदनं च ॥ १ ॥
भीमेन द्रौणिमस्तकमणिदा नेन द्रौपदीसमाश्वासनम् ॥ २ ॥
युधिष्ठिरेण द्रौपदीवचनात्स्वमस्तके तन्मणिधारणम् ॥ ३ ॥

१०-१६-० (६४६९१)
वैशम्पायन उवाच। १०-१६-०क्ष् (५२९७)
तदाज्ञाय हृषीकेशो विकृष्टं पापकर्मणा ।
हृष्यमाण इदं वाक्यं द्रौणिं प्रत्यब्रवीत्तदा ॥ १०-१६-१ (६४६९२)
विराटस्य सुतां पूर्वं स्नुषां गाण्डीवधन्वनः ।
उपप्लाव्यगतां दृष्ट्वा ऋतवाग्ब्रह्मणोऽब्रवीत् ॥ १०-१६-२ (६४६९३)
परिक्षीणेषु कुरुषु पुत्रस्तव भविष्यति ।
एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति ॥ १०-१६-३ (६४६९४)
तस्य तद्वचनं साधोः सत्यमेव्भविष्यति ।
परिक्षिद्भविता ह्येषां पुनर्वंशकरः सुतः ॥ १०-१६-४ (६४६९५)
त्वां तु कापुरुषं पापं विदुः सर्वे मनीषिणः ।
असकृत्पापकर्माणं बालजीवितघातकम् ॥ १०-१६-५ (६४६९६)
तस्मात्त्वमस्य पापस्य कर्मणः फलमाप्नुहि ।
त्रीणि वर्षसहस्राणि चरिष्यसि महीमिमाम् ॥ १०-१६-६ (६४६९७)
अप्राप्नुवन्क्वचित्काञ्चित्संविदं जातु केनचित् ।
निर्जनानसहायस्त्वं देशान्प्रविचरिष्यसि ॥ १०-१६-७ (६४६९८)
भवित्री न हि ते क्षुद्र जनमध्येषु संस्थितिः ।
पूयशोणितगन्धी च दुर्गकान्तारसंश्रयः। १०-१६-८ (६४६९९)
विचरिष्यसि पापात्मंश्चिरमेको वसुन्धराम् ॥
वयः प्राप्य परिक्षित्तु देवव्रतमवाप्य च। १०-१६-९ (६४७००)
कृपाच्छारद्वताच्छूरः सर्वास्त्राण्युपपत्स्यते ॥
विदित्वा परमास्त्राणि क्षत्रधर्मव्रते स्थितः। १०-१६-१० (६४७०१)
षष्टिं वर्षामि धर्मात्मा वसुधां पालयिष्यति ॥
इतश्चोर्ध्वं महाबाहुः कुरुराजो भविष्यति। १०-१६-११ (६४७०२)
परिक्षिन्नाम नृपतिर्मिषतस्ते सुदुर्मते ॥
श्अहं तं जीवयिष्यामि दग्धं शस्त्राग्नितेजसाघ। १०-१६-१२ (६४७०३)
पश्य मे तपसो वीर्यं सत्यस्य च नराधम ॥ १०-१६-१३ (६४७०४)
व्यास उवाच ।
यस्मादनादृत्य कृतं त्वयाऽस्मान्कर्म दारुणम् ।
ब्राह्मणस्य सतश्चेदं वृत्तमन्यायवर्तिनः ॥ १०-१६-१३क्ष् (५२९८)
तस्माद्यद्देवकीपुत्र उक्वानुत्तमं वचः ।
आलोकात्तव तद्भावि क्षुद्रकर्मन्व्रजेति ह ॥ १०-१६-१४ (६४७०५)
अश्वत्थामोवाच। १०-१६-१५क्ष् (५२९९)
सहैव भवता ब्रह्मन्स्थास्यामि पुरुषेष्विह ।

सत्यवागस्तु भगवानयं च पुरुषोत्तमः ॥ १०-१६-१५ (६४७०६)
वैशम्पायन उवाच। १०-१६-१६क्ष् (५३००)
प्रदायाथ मणिं द्रौणिः पाण्डवानां महात्मनाम् ।
जगाम विमनास्तेषां सर्वेषां पश्यतां वनम् ॥ १०-१६-१६ (६४७०७)
पाण्डवाश्च सदाशार्हास्तानृषीनभिवाद्य च ।
कृष्णद्वैपायनं चैव नारदं चैव पर्वतम् ॥ १०-१६-१७ (६४७०८)
द्रोणपुत्रस्य सहजं मणिमादाय सत्वराः ।
द्रौपदीमभ्यधावन्त प्रायोपेतां मनस्विनीम् ॥ १०-१६-१८ (६४७०९)
वैशम्पयन उवाच। १०-१६-१९क्ष् (५३०१)
ततस्ते पुरुषव्याघ्राः सदश्वैरनिलोपमैः ।
अभ्ययुः सहदाशार्हाः शिबिरं पुनरेव हि ॥ १०-१६-१९ (६४७१०)
अवतीर्य रथेभ्यस्तु त्वरमाणा महारथाः ।
ददृशुर्द्रौपदीं हृष्टामार्तामार्ततराः स्वयम् ॥ १०-१६-२० (६४७११)
तामुपेत्य निरानन्दां दुःखशोकसमन्विताम् ।
परिवार्य व्यतिष्ठन्त पाण्डवाः सहकेशवाः ॥ १०-१६-२१ (६४७१२)
ततो राज्ञाऽभ्यनुज्ञातो भीमसेनो महाबलः ।
प्रददौ तं मणिं दिव्यं वचनं चेदमब्रवीत् ॥ १०-१६-२२ (६४७१३)
अयं भद्रे तव मणिः पुत्रहन्ता जितश्च ते ।
उत्तिष्ठ शोकमुत्सृज्य क्षात्रधर्ममनुस्मर ॥ १०-१६-२३ (६४७१४)
प्रयाणे वासुदेवस्य शमार्थवसितेक्षणे ।
यान्युक्तानि त्वया भीरु वाक्यानि मधुघातिनि ॥ १०-१६-२४ (६४७१५)
नैव मे पतयः सन्ति न पुत्रा भ्रातरो न च ।
न वै त्वमिति गोविन्द शममिच्छति राजनि ॥ १०-१६-२५ (६४७१६)
उक्तवत्यसि तीव्राणि वाक्यानि पुरुषोत्तमम् ।
क्षत्रधर्मानुरूपाणि तानि संस्मर्तुमर्हसि ॥ १०-१६-२६ (६४७१७)
हतो दुर्योधनः पापो राज्यस्य परिपन्थिकः ।
दुःशासनस्य रुधिरं पीतं विस्फुरतो मया ॥ १०-१६-२७ (६४७१८)
वैरस्य गतमानृण्यं न स्म वाच्या विवक्षताम् ।
जित्वा मुक्तो द्रोणपुत्रो ब्राह्मण्याद्गौरवेण च ॥ १०-१६-२८ (६४७१९)
यशोऽस्य पतितं देवि शरीरं त्ववशेषितम् ।
वियोजितश्च मणिना भ्रंशितश्चायुधं भुवि ॥ १०-१६-२९ (६४७२०)
द्रौपद्युवाच। १०-१६-३०क्ष् (५३०२)
केवलानृण्यमाप्ताऽस्मि गुरुपुत्रो गुरुर्मम ।
शिरस्येतं मणिं राजा ग्रहीतुमनघोऽर्हति ॥ १०-१६-३० (६४७२१)
तं गृहीत्वा ततो राजा शिरस्येवाकरोत्तदा ।
गुरोरुच्छेषमित्येव द्रौपद्या वचनादपि ॥ १०-१६-३१ (६४७२२)

ततो दिव्यं मणिवरं शिरसा धारयन्प्रभुः ।
शुशुभे स तदा राजा सचन्द्र इव पर्वतः ॥ १०-१६-३२ (६४७२३)
उत्तस्थौ पुत्रशोकार्ता ततः कृष्णा मनस्विनी ।
कृष्णं चापि महाबाहुः परिपप्रच्छ धर्मराट् ॥ ॥ १०-१६-३३ (६४७२४)

इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि षोडशोऽध्यायः ॥ १६ ॥
Mahabharata - Sauptika Parva - Chapter Footnotes

१०-१६-७ संविदं संलापम् ॥
१०-१६-१८ प्रायोपेतां मरणार्थं यो नियमस्तेनोपेताम् ॥
१०-१६-२० हृष्टामश्वत्थाम्नः पराभवेन ।आर्ता पुत्रादेः शोकेन ॥
१०-१६-२४ मधुघातिनि मधुदैत्यहन्तरी ॥
१०-१६-२८ विवक्षतां वक्तुमिच्छतां वाच्याः निन्द्याः नैव स्म ॥
१०-१६-१६ षोडशोऽध्यायः ॥

सौप्तिकपर्व - अध्याय ०१७
॥ श्रीः ॥
१०.१७. अध्यायः १७

Mahabharata - Sauptika Parva - Chapter Topics
युधिष्ठिरेण द्रौणेरेकस्य बहुमारणशक्तिप्रश्ने कृष्णेन
रुद्रप्रसादादित्युक्त्वा रुद्रमहिमकथनम् ॥ १ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-१७-० (६४७२५)
वैशम्पायन उवाच। १०-१७-०क्ष् (५३०३)
हतेषु सर्वसैन्येषु सौप्तिके तै रथैस्त्रिभिः ।
शोचन्युधिष्ठिरो राजा दाशार्हमिदमब्रवीत् ॥ १०-१७-१ (६४७२६)
कथं नु कृष्ण पापेन क्षुद्रेण शठबुद्धिना ।
द्रौणिना निहताः सर्वे मम पुत्रा महारथाः ॥ १०-१७-२ (६४७२७)
तथा कृतास्त्रविक्रान्ताः सङ्ग्रामेष्वपलायिनः ।
द्रुपदस्यात्मजाश्चैव द्रोणपुत्रेण पातिताः ॥ १०-१७-३ (६४७२८)
यस्य द्रोणो महेष्वासो न प्रादादाहवे मुखम् ।
निजघ्ने रथिनां श्रेष्ठं धृष्टद्युम्नं कथं नु सः ॥ १०-१७-४ (६४७२९)
किन्नु तेन कृतं कर्म तथायुक्तं नरर्षभ ।

यदेकः समरे सर्वानवधीन्नो गुरोः सुतः ॥ १०-१७-५ (६४७३०)
श्रीभगवानुवाच। १०-१७-६क्ष् (५३०४)
नूनं स देवदेवानामीश्वरेश्वरमव्ययम् ।
जगाम शरणं द्रौणिरेकस्तेनावधीद्बहून् ॥ १०-१७-६ (६४७३१)
प्रसन्नो हि महादेवो दद्यादमरतामपि ।
वीर्यं च गिरिशो दद्याद्येनेन्द्रमपि शातयेत् ॥ १०-१७-७ (६४७३२)
वेदाहं हि महादेवं तत्त्वेन भरतर्षभ ।
यानि चास्यपुराणानि कर्माणि विविधानि च ॥ १०-१७-८ (६४७३३)
आदिरेष हि भूतानां मध्यमन्तश्च भारत ।
विचेष्टते जगच्चेदं सर्वमस्यैव कर्मणा ॥ १०-१७-९ (६४७३४)
एवं सिसृक्षुर्भूतानि ददर्श प्रथमं विभुः ।
पितामहोऽब्रवीच्चैनं भूतानि सृज माचिरम् ॥ १०-१७-१० (६४७३५)
हरिकेशस्तथेत्युक्त्वा दीर्घदर्शी तदा प्रभुः ।
दीर्घकालं तपस्तेपे मग्नोऽम्भसि महातपाः ॥ १०-१७-११ (६४७३६)
सुमहान्तं ततः कालं प्रतीक्ष्यैनं पितामहः ।
स्रष्टारं सर्वभूतानां ससर्ज मनसाऽपरम् ॥ १०-१७-१२ (६४७३७)
सोऽब्रवीद्घातरं दृष्ट्वा गिरिशं सुप्तमम्भसि ।
यदि मे नाग्रजोऽस्त्यन्यस्ततः स्रक्ष्याम्यहं प्रजाः ॥ १०-१७-१३ (६४७३८)
तमब्रवीत्पिता नास्ति त्वदन्यः पुरुषोऽग्रजः ।
स्थाणुरेष जले मग्नो विस्रब्धः कुरु वै प्रजाः ॥ १०-१७-१४ (६४७३९)
भूतान्यन्वसृजत्सप्त दक्षः क्षिप्रं प्रजापतिः ।
यैरिमं व्यकरोत्सर्वं भूतग्रामं चतुर्विधम् ॥ १०-१७-१५ (६४७४०)
ताः सृष्टमात्राः क्षुधिताः प्रजाः सर्वाः प्रजापतिम् ।
बिभक्षयिवो राजन्सहसा प्राद्रवंस्तदा ॥ १०-१७-१६ (६४७४१)
स भक्ष्यमाणस्त्राणार्थी पितामहमुपाद्रवत् ।
आभ्यो मां भगवांस्त्रातु वृत्तिरासां विधीयताम् ॥ १०-१७-१७ (६४७४२)
ततस्ताभ्यो ददावन्नमोषधीः स्थावराणि च ।
जङ्गमानि च भूतानि दुर्बलानि बलीयसाम् ॥ १०-१७-१८ (६४७४३)
विहितान्नाः प्रजास्तास्तु जग्मुस्तुष्टा यथागतम् ।
ततो ववृधिरे राजन्प्रीतिमत्यः स्वयोनिषु ॥ १०-१७-१९ (६४७४४)
भूतग्रामे विवृद्धे तु सृष्टे देवासुरे तदा ।
उदतिष्ठज्जलाज्ज्येष्ठः प्रजाश्चेमा ददर्श सः ॥ १०-१७-२० (६४७४५)
बहुरूपाः प्रजाः सृष्टा विवृद्धाश्च स्वतेजसा ।
चुक्रोध बलवद्दृष्ट्वा लिङ्गं स्वं चाप्यविध्यत ॥ १०-१७-२१ (६४७४६)
तत्प्रविद्धं तथा भूमौ तथैव प्रत्यतिष्ठत ।
तमुवाचाव्ययो ब्रह्मा वचोभिः शमयन्निव ॥ १०-१७-२२ (६४७४७)

किं कृतं सलिले शर्व चिरकालस्थितेन ते ।
किमर्थं चेदमुत्पाद्य लिङ्गं भूमौ प्रवेशितम् ॥ १०-१७-२३ (६४७४८)
सोऽब्रवीज्जातसंरम्भस्तथा लोकगुरुर्गुरुम् ।
प्रजाः सृष्टाः परेणेमाः किं करिष्याम्यनेन वै ॥ १०-१७-२४ (६४७४९)
प्रजाः सृष्टाः परेणेमाः प्रजार्थं मे पितामह ।
ओषध्यः परिवर्तेरन्यथैवं सततं प्रजाः ॥ १०-१७-२५ (६४७५०)
एवमुक्त्वा स सक्रोधो जगाम विमना भवः ।
गिरेर्मुञ्जवतः पादं तपस्तप्तुं महातपाः ॥ ॥ १०-१७-२६ (६४७५१)

इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि सप्तदशोऽध्यायः
॥ १७ ॥

सौप्तिकपर्व - अध्याय ०१८
॥ श्रीः ॥
१०.१८. अध्यायः १८

Mahabharata - Sauptika Parva - Chapter Topics
कृष्णेन युधिष्ठिरम्प्रति रुद्रस्य कोपप्रसादाक्ष्यां देवानां
यज्ञनाशतत्प्रवृत्तिकथनपूर्वकं तत एवाश्वत्थामद्वारा
पुत्रादिवध सम्भवकथनम् ॥ १ ॥

Mahabharata - Sauptika Parva - Chapter Text

१०-१८-० (६४७५२)
कश्रीभगवानुवाच। १०-१८-०क्ष् (५३०५)
ततो देवयुगेऽतीते देवा वै समकल्पयन् ।
यज्ञवेदप्रमाणेन विधिवद्यष्टुमीप्सवः ॥ १०-१८-१ (६४७५३)
कल्पयामासुरथ ते साधनानि हवींषि च ।
भागार्हा देवताश्चैव यज्ञियं द्रव्यमेव च ॥ १०-१८-२ (६४७५४)
ता वै रुद्रमजानन्त्यो याथातथ्येन देवताः ।
नाकल्पयन्त देवस्य स्थाणोर्भागं नराधिप ॥ १०-१८-३ (६४७५५)
सोऽकल्प्यमाने भागे तु कृत्तिवासा मखेऽमरैः ।
तपसा यज्ञमन्विच्छन्धनुरादौ ससर्ज ह ॥ १०-१८-४ (६४७५६)
लोकयज्ञः क्रियायज्ञो गृहयज्ञः सनातनः ।
पञ्चभूतनृयज्ञश्च जज्ञे सर्वमिदं जगत् ॥ १०-१८-५ (६४७५७)
लोकयज्ञैर्नृयज्ञैश्च कपर्दी विदधे धनुः ।

धनुः सृष्टमभूत्तस्य षष्टिकिष्कुप्रमाणतः ॥ १०-१८-६ (६४७५८)
वषट्कारोऽभवज्ज्या तु धनुषस्तस्य भारत ।
यज्ञाङ्गानि च चत्वारि तस्य सन्नहनेऽभवन् ॥ १०-१८-७ (६४७५९)
ततः क्रुद्धो महादेवस्दुपादाय कार्मुकम् ।
आजगामाथ तत्रैव यत्र देवाः समीजिरे ॥ १०-१८-८ (६४७६०)
तमात्कार्मुकं दृष्ट्वा ब्रह्मचारिणमव्ययम् ।
विव्यथे पृथिवी देवी पर्वताश्च चकम्पिरे ॥ १०-१८-९ (६४७६१)
न ववौ पवनश्चैव नाग्निर्जज्वाल वैधितः ।
व्यभ्रमच्चापि संविग्नं दिवि नक्षत्रमण्डलम् ॥ १०-१८-१० (६४७६२)
न बभौ भास्करश्चापि सोमः श्रीमुक्तमण्डलः ।
तिमिरेणाकुलं सर्वमाकाशं चाभवृद्वृतम् ॥ १०-१८-११ (६४७६३)
अभिभूतास्ततो देवा विषयान्न प्रजज्ञिरे ।
न प्रत्यभाच्च यज्ञः स देवतास्त्रेसिरे तथा ॥ १०-१८-१२ (६४७६४)
ततः स यज्ञं विव्याध रौद्रेण हृदि पत्रिणा ।
अपक्रान्स्ततो यज्ञो मृगो भूत्वा सपावकः ॥ १०-१८-१३ (६४७६५)
स तु तेनैव रूपेण दिविस्थो वै व्यराजत ।
अन्वीयमानो रुद्रेण युधिष्ठिर नभस्तले ॥ १०-१८-१४ (६४७६६)
अपक्रान्ते ततो यज्ञे संज्ञा न प्रत्यभात्सुरान् ।
नष्टसंज्ञेषु देवेषु न प्राज्ञायत किञ्चन ॥ १०-१८-१५ (६४७६७)
त्र्यम्बकः सवितुर्बाहू भगस्य नयने तथा ।
पूष्णश्च दशनान्क्रुद्धो धनुष्कोट्या व्यशातयत् ॥ १०-१८-१६ (६४७६८)
प्राद्रवन् ततो देवा यज्ञाङ्गानि च सर्वशः ।
केचित्तत्रैव घूर्णन्तो गतासव इवाभवन् ॥ १०-१८-१७ (६४७६९)
स तु विद्राव्य तत्सर्वं शितिकम्ठोऽवहस्य च ।
अवष्टभ्य धनुष्कोटिं रुरोध विबुधांस्ततः ॥ १०-१८-१८ (६४७७०)
ततो वागमरैरुक्ता ज्यां तस्य धनुषोऽच्छिनत् ।
अथ तत्सहसा राजंश्छिन्नज्यं विस्फुरद्धनुः ॥ १०-१८-१९ (६४७७१)
ततो विधनुषं देवा देवश्रेष्ठमुपागमन् ।
शरणं सह यज्ञेन प्रसादं चाकरोत्प्रभुः ॥ १०-१८-२० (६४७७२)
ततः प्रसन्नो भगवान्प्रास्यत्कोपं जलाशये ।
स जलं पावको भूत्वा शोषयत्यनिशं प्रभो ॥ १०-१८-२१ (६४७७३)
भगस्य नयने चैव बाहू च सवितुस्तथा ।
प्रादात्पूष्णश्च दशनान्पुनर्यज्ञांश्च पाण्डव ॥ १०-१८-२२ (६४७७४)
ततः सुस्थमिदं सर्वं बभूव पुनरेव हि ।
सर्वाणि च हवींष्यस्य देवा भागमकल्पयन् ॥ १०-१८-२३ (६४७७५)
तस्मिन्क्रुद्धेऽभवत्सर्वमसुस्थं भुवनं प्रभो ।

प्रसन्ने च पुनः सुस्थं जगद्भवति भारत ॥ १०-१८-२४ (६४७७६)
ततस्ते निहताः सर्वे तव पुत्रा महारथाः ।
अन्ये च बहवः शूराः पाञ्चालस्य पदानुगाः ॥ १०-१८-२५ (६४७७७)
न तन्मनसि कर्व्यं न च तद्द्रौणिना कृतम् ।
महादेवप्रसादः स कुरुकार्यमनन्तरम् ॥ ॥ १०-१८-२६ (६४७७८)

इति श्रीमन्महाभारते शतसाहस्रिकायां संहितायां वैयासिक्यां
सौप्तिकपर्वणि ऐषीकपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥ समाप्तं
ऐषीकपर्व ॥ २ ॥ सौप्तिकपर्व च समाप्तम्॥ १० ॥
अस्यानन्त्रं स्त्रीपर्व भविष्यति
तस्यायमाद्यः श्लोकः । १०-१८-१ (६४७७९)
१०-१८-१क्ष् (५३०६)
जनमेजय उवाच ।
हते दुर्योधने चैव हते सैन्ये च सर्वशः ।
धृतराष्ट्रो महाराज श्रुत्वा किमकरोन्मुने ॥
Mahabharata - Sauptika Parva - Chapter Footnotes

१०-१८-५ लोकयज्ञो लोकेषणा सर्वो मां साधुमेव जानात्विति
वासनारूपः । क्रियायज्ञः गर्भाधानादिसंस्काररूपः। गृहयज्ञः
पत्नीसाध्याग्निहोत्रादिः। पञ्चभूतनृयज्ञः पञ्चभूतानां
गुणैः शब्दादिभिर्या नृणां प्रीतिस्तद्रूपः। विषयजं
सुखमित्यर्थः। एतैरेव चतुर्भिर्यज्ञैः सर्वं जगत्सृष्टम् ॥
१०-१८-६ तत्र मध्यमयोः शास्त्रोक्तयोर्यज्ञयोर्नाशार्थं
प्रथमचरमयज्ञाभ्यामीश्वरो धनुः कृतवान् किष्कुर्हस्तः ॥
१०-१८-१८ अष्टादशोऽध्यायः ॥

Please send corrections to sanskrit@cheerful.com
Last updated October 14, 2013
http://sanskritdocuments.org